रघुनाथदासविरचिता

मदनकेलितरंगिणी

सम्पादकः

पण्डित डॉ० अद्वैतचरणधलः

साहित्याचार्यः, विद्यावारिधिः (Ph.D.)

(Rastriya Sanskrit Sansthan, New Delhi);

Diploma in Indian Language & Literature (University for Foreigners, Perugia, Italy), साहित्याध्यापकः,

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी

पण्डितरघुनाथदासेन विरचिता

मदनकेलितरङ्गिणी

☐ सम्पादकः

डॉ. अद्वैतचरण धलः

वरिष्ठ-प्राध्यापकः साहित्यविभागः,

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः

श्रीविहारः पुरी-752002

☐ प्रकाशिका

(c) **श्रीमती सुवासिनी धलः**

☐ प्रथमसंस्करणम्—1993

☐ मुद्रकम्—**अर्चना प्रकाशन, अजमेरम्**

☐ मूल्यम्—रु. 60 00

☐ प्राप्तिस्थानम्—

लोकभाषाप्रचारसमितिः, पुरी-752002

MADANAKELI-TARANGINEE

of

Pandita Raghunatha Dass

Editor : **Adwaita Charan Dhal**

Senior Lecturer, Dept of Sahitya

Sri Jagannatha Sanskrit Vishwavidyalaya,

SRI VIHAR, PURI-752002

Publisher :

(c) **Smt. Subasini Dhal**

First Edition—1993

Printer—**Archana Prakashan, Ajmer**

Price—**Rs. 60.00**

Available at :

Lokabhasha Prachar Samitih

Puri-752002

अनुक्रमणिका

□

विषयानुक्रमणिका [क]

प्रथमभागः—संक्षिप्तसमीक्षात्मिका भूमिका

मदनकेलितरङ्गिण्याः
विषयानुक्रमणिका [ख]

प्रथमतरङ्गः

द्वितीयतरङ्गः

तृतीयतरङ्गः

समाप्ता

□

संकेतसूचीपट्टिका

1	द्र.	—	द्रष्टव्यम्
2	पा.	—	पाठभेदः
3	पृ.	—	पृष्ठा
4	प्र. तः.	—	प्रथमः तरङ्गः
5	सा. द.	—	साहित्यदर्पणः
6	सा. भूः.	—	साहित्यभूषणम्
7	सं	—	सम्पादकः

परिशीलिताः ग्रन्थाः शोधलेखाश्च

1 अमरकोषः, सं – श्री पं. हरगोविन्द शास्त्री, वाराणसी, 1970

2 काव्यप्रकाशः, सं—रघुनाथ दामोदर करमारकर, पुने, 1965

3 दशरूपकम्, सं, टि, वेंकटाचार्यः, अडेयार रिसर्च सेण्टर, भद्रपुरी,

4 नाट्यशास्त्रम्—

5 साहित्यदर्पणः—सं ड. सत्यव्रतसिंहः, वाराणसी, 1963

6 साहित्यभूषणम्—सं, ड. अद्वैतचरण धलः, तिरुपति, 1978

7 सिद्धान्त कौमुदी, सं, सि. शंकरराम शास्त्री, मद्रपुरी, 1929

8 हिन्दी कामसूत्र—सं श्री देवदत्त शास्त्री,
वाराणसी, संवत्, 2039 [1982]

आधुनिक विमर्शग्रन्थाः

[क] हिन्दीः—आर. पि. चतुर्वेदी—श्रृङ्गाररस का शास्त्रीय विवेचन

[ख] उडिया—

1 केदारनाथ महापात्र—खुरुधा इतिहास, भुवनेश्वर, 1969

2 भागिरथी महापात्र—रत्नकोष वा वृहत विविध रत्नसंग्रह, कटक, 1965

3 श्री वलरामदास—सुन्दरी, कटक, 1972

□

ENGLISH

H. H. Wilson—

1 Drama or a complete account of the Dramatic literature of Hindus. Chowkhamba Sanskrit Series, Varanasi.

Harekrishna Mahatab—

1 The History of Orissa, Cuttak, 1959.

Kunjunni Raja—

New Catalogus Catalogarum, University of Madras, 1973.

Krishna Moorthy—

1 Some thoughts on Indian Asthetics and Literary Criticism, Prasananga, 1969.

Kedarnatha Mohapatra—

1 A Descriptive catalogue of Sanskrit Manuscripts of Orissa, Vol—I & II, Orissa State Musium, Bhubaneswar 1, 1958.

2 A Descriptive Catalogue of Sanskrit Manuscripts, of Orissa, Vol—II, Orissa Sahitya Academy, Bhubneswar, 1960

Mahesh Prasad Dash—

1 A Descriptive Catalogue of Sanskrit Manuscripts, of Orissa, Vol. V, Orissa State Musium, Bhubaneswar,1965

Nilamani Mishra —

1 An Alphabetical Catalogue of Sanskrit Manuscripts, Part—I, Orissa State Musium, Bhubaneswar, 1973

2 The Notices of Palm Leaf Manuscripts Orissa State Musium, Bhubaneswar, 1968

R. Satyanarayan—

Bharatanatya : A critical study Karalakshmi, 1969

S. N. Katre—

Introduction to Indian Texual Criticism, Poona, 1954

Theoror Aufrecht—

Catalogue Cataloaorum, Part—1, FRANZ stainer Verlag CMBH Wiesbadon, 1962.

ARTICLES (शोधलेखः)

K. H. Rao—"रससिद्धान्तपरिशीलनम्" Bharati Vol. XIX (5), PP. 193-96, 245-47, 287-88, 1969.

Kedaranatha Mahapatra—

1 "Raghunath Das, A celebrated auther of some Sanskrit works of Orissa", Orissa Historical Research Journal, Vol. XI, No.—2 P. 82, Bhubaneswar, Orissa)

M. A. Coulson—

"An Approach to the theory of Rash"
Journal of the Ancient Indian History.
Univetsity of Calcutta, 11 (1-2), PP. 239-41 (1969)

M. P. Dash—

Notices of Palm Leaf Manuscripts found of Bhirgurpur and A note or some more works by Raghunath Das, Orissa Historical Research Journal, Vol.XV. No. 1 & 2, PP. 45-52, Bhubaneswar, Orissa, 1967

Rabi Shanker Banerjee—

"रसः शृङ्गार एव एकः" Summary of papers.
25th All-India Oriental Confcrences; PP. 394, Calcutta, 1969

Shiva Prasad Vardwaj—"केचिदतिरिक्ताः सात्त्विकभावाः"
Viswasanskritam, Vol VI (1), PP. 3-10

Shrinivas—करुणविप्रलम्भो नाम शृङ्गारः
Viswasanskritam, Vol. VI (2-3) PP. 118-26 (1969)

प्रथमभागः

संक्षिप्तसमीक्षात्मिका भूमिका

प्रथमः भागः

संक्षिप्तसमीक्षात्मिका भूमिका

0. मानवजीवनस्य नियमनार्थं व्यवस्थितार्थं जीवनस्य लक्ष्यनिर्द्धारणाय च संविधानम् आवश्यकमेव। तदर्थम् अधुना पाश्चात्यजगति आलोचना प्रचलति। प्राच्य-जगति प्रथमतया भारतवर्षे अस्मिन् विषये बहुचर्चा प्रचलिता आसीत्। आर्यावर्त्तेऽस्मिन् मुनयः शास्त्रविदः समाजसंस्कारकाश्च श्रृङ्खलितगार्हस्थ्यजीवनार्थं, सुस्थप्रजननार्थं च सम्भोगविषयमाधारीकृत्य बहूनि शास्त्राणि रचितवन्तः। तत् शास्त्रं 'कामशास्त्रं' 'कामसूत्रम्' च इति नाम्ना प्रसिद्धं दृश्यते। यदि च आर्यमुनयः न अधुनातनानाम् इव इतिहासविषये आलोचनातत्परा आसन्, तथापि वैदिकपरम्परामनुसृत्य शास्त्राणां दैवीप्रदत्तत्वं प्रतिपादनाय कथमपि, कुत्रचित् ऐतिहासिकतथ्यं प्रदत्तवन्तः। तत्तु अधोनिर्द्दिष्टम्।

0.1 प्रथमतया सृष्टिकर्त्ता प्रजापतिः मानवजीवनस्य लक्ष्यं निर्द्धारयितुम् एकलक्ष्याध्यायविशिष्ट (१,०००,००) संविधानमेकं प्रस्तुतवान्। यत्र जीवनस्य प्रत्येकं स्तरं लक्ष्यीकृत्य प्रत्येकस्मिन् विषये विषदनिरूपणं दृश्यते। तत् विशालशास्त्रं विभज्य

आचार्यो मनुः आचार-शास्त्रस्य पृथक् संस्करणमेकं प्रस्तुतवान्। यदद्य मानव-धर्मशास्त्रं, मनुसहिता, मनुस्मृतिः वा इति नाम्ना विख्यातं वर्तते। तस्या मनुस्मृतेः संक्षिप्तस्वरूपम् अद्य व्यवहृतं भवति।

0.2 अस्य विशाल संविधानस्य अर्थशास्त्रविषयकभागं पृथक्कीकृत्य आचार्यः बृहस्पतिः 'बार्हस्पत्यम्' इति अर्थशास्त्रं रचितवान्। तदनन्तरं तस्मादेव संविधानात् कामशास्त्र-विषयं पृथक्कीकृत्य देव-देव-महादेव-स्यानुचरो नन्दी एकसहस्राध्यायविशिष्टं (१,०००) कामशास्त्रं सम्पादितवान्। तस्मादेव संस्करणात् आचार्यश्वेतकेतुः पंचशताध्याय विशिष्टं (५००) कामशास्त्रस्य एकं संक्षिप्त-संस्करणं प्रस्तुतवान्। तदनन्तरं पचाल देशजः आचार्यः बाभ्रव्यः श्वेतकेतुद्वारा सम्पादितं संस्करणं संक्षिप्तीकृत्य सार्द्धैकशताध्यायविशिष्टं एक संक्षिप्त-संस्करणं प्रास्तौत्। यदेव शताधिकरणविशिष्टम् आसीत्।

0.3 वस्तुतः बाभ्रव्यात् कामशास्त्रस्य नवीनायाः परम्परायाः सूत्रपातः अभूत्, ब्रह्मण आरभ्य बाभ्रव्यं यावत् कामशास्त्रस्य परम्परायाः पर्यवेक्षणेन एतत् प्रतिभाति यत् ब्रह्मा कामशास्त्रस्य रचनां नं कृतवान्। परन्तु तदीय प्रवचनं प्रदत्तवान्। एवंच सर्वप्रथमतया बाभ्रव्यः तत्कामशास्त्रस्य स्वरूपं प्रदत्तवान्। अस्मात् अयमेव निष्कर्षः प्रतिफलितो भवति यत् कामशास्त्रस्य रचनाकालः प्रवचनकालदेव प्रबहृति। एतत् कथनं वात्स्यायनकृतस्य कामशास्त्रस्य पंचमसूत्रात् आरभ्य प्रमाणितं भवति[1]।

---

1 प्रजापतिर्हि प्रजा सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गस्य साधनमध्यायानां शतसहस्रेणाग्रे प्रोवाच।

> तस्यैकदेशीकं मनुः स्वायम्भुवो धर्माधिकारिकं पृथक् चकार,
> बृहस्पतिरर्थाधिकारिकम्।

महादेवानुचरश्च नन्दी सहस्रेणाध्यायानां पृथक् कामसूत्रं प्रोवाच। तदेव तु पंचभिरध्यायशतैरौद्दालकिः श्वेतकेतुः संचिक्षेपा। तदेव तु पुनरध्यर्धेनाध्यायशतेन साधारण—साम्प्रयोगिक-कन्या सम्प्रयुक्तक-भार्याधिकारिक-पारदारिक-वैशिक-औपनिषदिकैः सप्तभिरधिकरणैर्बाभ्रव्यः पाञ्चालः संचिक्षेप। (का. सू. पृ. 11-14)

अतः सिद्धो भवति यत् प्रवचनकालात् बहुदिनानन्तरं शास्त्राणां संक्षिप्तीकरणस्य सम्पादनस्य च प्रणाली प्रचलिता आसीत् ।

0.4 बाभ्रव्यद्वारा सम्पादितकामशास्त्रस्य व्यापकप्रचलनात् अनन्तरं पाटलिपुत्रगणिकाभिः अनुरुध्यमानेन आचार्ययास्केन बाभ्रव्य-कामशास्त्रस्य वैशिकनामकं षष्ठप्रकरण विहाय कामशास्त्र सम्पादितम् । अनन्तरं आचार्य-नारायणः साधारणाधिका रणं, आचार्यसुवर्णनाभः साम्प्रयोगिकाधिकरणम्, आचार्यघोटकमुखः कन्यासम्प्रयुक्तकाधिकरणम्, आचार्य-गौनर्यः भार्याधिकारी-करणम्, आचार्यः गणिकापुत्रः पारदारिकाधिकरणम्, आचार्य-कुचुमारः औपनिषदिकाधिकरणं, बाभ्रव्यस्य कामशास्त्रात् पृथक्कीकृत्य सम्पादितवन्तः । आचार्य-बाभ्रव्यद्वारा सम्पादितं कामशास्त्रम् अतिशयं विस्तृतम् आसीत्। अतः तत् सर्वसाधारणो-पयोगि नाऽभूत् । आचार्य दत्ताकात् आरभ्य कुचुमारं यावत् सर्वे आचार्याः कामशास्त्रस्य एकैकं अंशमात्रं संक्षिप्ती-कृत्य शास्त्रमिदं सम्पादिवन्तः । अतः कामशास्त्रविषयाणां सम्पूर्णतया अध्ययनम् असम्भवम् आसीत् । सर्वेषां विषयाणाम् आवश्यकताम् अनुभूय आचार्यः वात्स्यायनः कामसूत्र रचितवान्। कामशास्त्रसम्पादनादनन्तरम् आचार्यः वात्स्यायनः तस्य मंतव्यं निम्नोक्तप्रकारेण प्रतिज्ञातवान् ।

'सर्वमर्थमल्पेनग्रन्थेन कामसूत्रमिदं प्रणीतम् ।' इति । अर्थात् संक्षिप्ताकारेण सर्वेषां प्रयाजनानां समावेशः अस्मिन् एव कामसूत्रे सजातः ।

0.5 उपलब्धस्य काममूत्रस्य प्रथमकर्त्ता केषांचित्मते वात्स्यायनो भवति । अन्येषां मते तु कौटिल्यः भवतीति मतद्वैधं परिलक्ष्यते । परन्तु अन्ये केचन हेमचन्द्र-वैजयन्ती त्रिकाण्डशेष-नाममालिका-दीनां कोषाणां परामर्शेण उभौ एक व्यक्तिरिति आमनन्ति । अन्ये च कौटिल्यस्य प्रधानशिष्यः कामन्दकः, वात्स्यायनः आसीदिति कथयन्ति । परन्तु इदानीं वात्स्यायन एव कामसूत्रस्य रचयिता इति सर्ववादीसम्मतं परम्पराश्रुतं च तत्र सहृदयाः प्रमाणम् ।

1. वात्स्यायनस्य कामसूत्रात् अनन्तरं संस्कृतभाषायाम् अन्यासु प्रान्तीयभाषासु च बहवः ग्रन्थाः सम्पादिताः दृश्यन्ते। ते कामसूत्रं, कामशास्त्रं, कामकला, कामकलाविज्ञानं, लोकशास्त्रं चेति नामभेदेन सम्पादिताः दृश्यन्ते। अष्टादशशतकस्य प्रारम्भकाले उत्कलीयः आचार्यः पण्डितरघुनासदासः कामसूत्र-विषयमाधारीकृत्य 'मदनकेलितरङ्गिणीति' नाम्ना शास्त्रमिदं रचितवान्। उत्कलदेशेऽपि कामशास्त्रस्य रचनापरम्परा आसीत्। उत्कलभाषया वात्स्यायनस्य कामसूत्रमाधारीकृत्य विरचितानि पुस्तकानि दृश्यन्ते। परन्तु रघुनाथदासस्य मदनकेलि-तरङ्गिणीमाश्रित्य उत्कलभाषया न कोऽपि ग्रन्थः उपलभ्यते। अतः अनुमीयते यत् यथा वात्स्यायनस्य प्रभावः सर्वेषां-विशेषतः उत्कलीयानाम् उपरि यथा दृश्यते न तथा रघुनाथदासस्य प्रभावः उत्कलीयानाम् उपरि दृश्यते। तथापि रघुनाथदासस्यैषः प्रयासः सर्वादौ अभिनन्दनीयः। अय रघुनाथ-दासः न केवल कामशास्त्रे शास्त्रान्तरेषु च कृतभूरिपरिश्रमः आसीत् इति मदीये 'पण्डितरघुनाथदास' इति रघुनाथदास-ग्रन्थमालायां प्रथम खण्डे विशदरूपेण प्रतिपादितमस्ति। ग्रन्थ-गौरवमयात् पुनरुक्तमयाच्च नाऽहं अत्र पुनः प्रतिपादयामि।

2. कामसूत्रकाराणां मतानुसारेण मुख्यतया कामसूत्रस्य प्रयोजनं धर्म-अर्थ काम प्राप्त्यर्थं भवति, वात्स्यायनमतानुसारं धर्मः पर-मार्थस्य सम्पादनं करोति। अतः धर्मस्य प्रवोधनकारि—शास्त्रस्य आवश्यकता अस्ति एव। अर्थसिद्धमर्थं विभिन्नानाम् उपायानाम् अवलम्बनं कर्त्तव्यम्। अतः एषाम् उपायानां प्रवोधनकारि—अर्थशास्त्रस्य आवश्यकता अस्ति। सम्भोगः सर्वथा पराधीनो भवति। तस्मादेव पराधीनात् स्त्रीपुरुषौ उद्वर्तुं कामशास्त्रस्य आवश्यकता अस्ति एव। वस्तुतः ये अस्य प्रच्छन्नरहस्यस्य माहात्म्य न जानन्ति ते शास्त्रस्यास्य विरोधिनः दृश्यन्ते। दाम्पत्यजीवनं सम्भोग-कार्यं च सुखकरं कर्तुम् अस्य आवश्य-कता अस्ति। दाम्पत्यजीवनावस्थायाः प्रभावः भविष्यत्वंश-पराणामुपरि सर्वथा पतति। यदि सम्भोगसुखं आनन्ददायकं न भवति तर्हि दाम्पत्यजीवनं यन्त्रणामयं भवति स्त्री-पुरुषयोः मानसिकी स्थितिः विश्रृङ्खलिता भवति, तर्हि एतदर्थं सम्भोग-

सुखाय चतुःषष्टिकलानाम् अध्ययनम् अवश्यं कर्त्तव्यम् । आसां कलानां ज्ञानं धर्मशास्त्राध्ययनद्वारा अर्थशास्त्राध्ययनद्वारा वा न सम्भवेत् । अतः गार्हस्थजीवनं सुखसम्पन्नम् आनन्दमयंच कर्तुं कामशास्त्रस्याध्ययनम् अनिवार्य्यमेव। भगवतः कृष्णदेवस्य उक्तिम् ऊररीकृत्य अस्य प्रयोजनविषये ग्रन्थसम्पादनस्य आवश्यकताविषये च पण्डितरघुनाथदासः सम्यक् प्रतिपादयति ।
'प्रजनश्चास्मि कन्दर्प' इति भगवदगीतायां भगवत्—
वचनात्मकस्य भगवद्रुपत्वात् केलि प्रतिपादकः
ग्रन्थोऽपि नानादरणीय इत्यतः आरभ्यते[1]"

3. अस्य ग्रन्थस्य मातृका रघुनाथदासस्य स्वकीये जन्मस्थाने सुन्दर ग्रामे मया प्राप्ता । १९७५ ख्रष्टाब्दे तस्य कृतस्य साहित्यभूषणमित्याख्यस्य ग्रन्थस्य शुद्धं संस्करणार्थं समीक्षात्मकमध्ययनार्थम् उपकरणानि संग्रहार्थं च अहं तस्य ग्रामं प्रति गतवान् । तत्र अधुनास्थितस्य तस्य वंशधरस्य जगदीशदासस्य गृहे इय मातृका सुरक्षिता आसीत् । तस्य पुत्रमधुसूदनदासः मम सुहृत् सहपाठी च वर्त्तते । तस्य साहाय्येन सम्प्राप्ता इयं मातृका मया । तामेव मातृकाम् अन्यामेकां कर्गजमातृकाम् आधारीकृत्य साहित्यभूषणसाहित्यदर्पणवात्स्यायनकामसूत्रादीनां साहाय्येन च सम्पादितोऽयं ग्रन्थः। या तालपत्रमातृका मया प्राप्ता सा मातृका रघुनाथदासस्यपुत्रेण दामोदरदासेन लिखिता इति मातृकायां स्थितायाः टिप्पण्याः समुपलभ्यते । सा टिप्पणी दामोदरदासेन लिखिता । तत्र स्थितानां अक्षराणां स्वरूपं ग्रन्थस्यैः अक्षरैः सह साम्यं स्थापयति । उत्कललिप्या सुन्दराक्षरेण लिखितोऽयं ग्रन्थः। अस्य ग्रन्थस्य लब्धा तालपत्रमातृका इदानीं मम पार्श्वे संरक्षिता वर्त्तते ।

3.1 इयं तालपत्रमातृका अस्माभिः प्रधानमातृरूपेण स्वीकृता । तालपत्रमातृकापाठैः सह कर्गजमातृकापठानां तुलनात्मकमध्ययन कृत्वा पाठनिर्णयः कृतः। तालपत्रमातृकाविसंवादिनः कर्गजमातृकापाठाः पादटिप्पणीरूपेण प्रदत्ताः सन्ति। तालपत्र-

---

1 मदनकेलितरङ्गिणी, प्र-तः, पृ.

मातृकायाः लिपिकारेण प्रतिलिपिकरणसमये यथावसरं टिप्पणी च संयोजिता वर्तते। ग्रन्थमध्ये निवेशिता तादृशी टिप्पणी ग्रन्थात् पृथक्कृत्य मूलग्रन्थे १.२.३ इत्यादिक्रमेण निवेशितान् संस्कृतांकाननुसृत्य मूलग्रन्थमधोऽधः उपस्थापितः।

ग्रन्थेऽस्मिन् साहित्यभूषण-प्रभृतीनां ग्रन्थानां कानिचित् वाक्यानि, कारिकाः, कानिचिदुदाहरणानि च यथायथ समाविष्टानि दृश्यते। तस्मात् तादृशेषु ग्रन्थभागेषु आकारग्रन्थानुशील्य पाठाः निश्चिताः सन्ति। संशोधनार्हाणां पाठानां संशोधितं रूपम् आवरणान्तर्गतं सत् प्रश्नचिह्नेन साकं सूचितम्। असाध्यबोधना अस्पष्टा च पाठाः अग्रे आवरणान्तर्गतप्रश्न[?]चिह्नेन सह निवेशिताः। लुप्तः ग्रन्थभागः प्रकृतग्रन्थसंवादिग्रन्थान्तरपरिशीलनपुरःसरमुपस्थापितः। ग्रन्थान्तरपरिशीलन-पुरःसरमुपस्थापितस्य ग्रन्थस्य, सर्वथा दुरूहस्य ग्रन्थपातस्य [—इत्येवं सूचितस्य] च उपरि १.२.३ इत्यादिक्रमेण संस्कृतांकाः निक्षिप्ताः, तैरेकैः संबन्धाश्च विषयाः पादटिप्पणीरूपेण मूलग्रन्थस्य अधोभागे समावेशिताः सन्तिः।

रघुनाथदासद्वारा प्रस्तुतानां सर्वेषां सप्तविंशतिसंख्यकानां ग्रन्थानां संस्करणं सम्पादनं च मया सम्पादनीयम् इति मनसि निधाय संक्षिप्तभूमिका-पुरःसरं शोधकर्तृणाम् उपलब्ध्यर्थं प्रस्तुतोऽयं ग्रन्थः अस्माभिः। अस्मिन् सम्पादिते ग्रन्थे पुनः शोधसहायार्थं विषयाणां श्लोकानां च सूची मया यथाशक्यं पृथक्कीकृत्य ग्रन्थारम्भे अन्ते च प्रदर्शिता।

4. सप्ततरङ्गविशिष्टोऽयं ग्रन्थः पद्यात्मकसूत्रशैल्या लिखितो वर्तते। ग्रन्थेऽस्मिन् द्वयशीत्युत्तरचतुःशतसंख्यकाः श्लोकाः (कारिकाः) वर्त्तन्ते। पण्डितरघुनाथदासः साहित्यक्षेत्रे कृतभूरिश्रमः दृश्यन्ते। शृङ्गारसविषयिणी चर्चा सम्यक् रूपेण दासेनात्रकृता दृश्यते। तस्य साहित्याभिरुचिः ग्रन्थेऽस्मिन् सुस्पष्टं प्रतिभाति। तस्य अलङ्कारशास्त्रस्य साहित्यभूषणस्य रचनानन्तरम् अस्य ग्रन्थस्य रचना तेन कृता इत्यनुमीयते। प्रत्येकस्य भागस्य कृते 'तरङ्गः' इति शब्दः ग्रन्थकारेण प्रयुक्तः। प्रत्येकस्य तरङ्गस्य प्रतिपाद्यविषयाः संक्षिप्तरूपेण अधोनिर्दिष्यः वर्तृते।

4.1 प्रथमतरङ्गे कौण्डिन्यकुलसम्भवपण्डितरघुनाथदासः ग्रन्थस्य निर्विघ्न-परिसमाप्त्यर्थम् अनुबन्ध-चतुष्टयं परामृश्य स्वस्य

इष्टदेवं श्रीमन्नृसिंहं नमस्कारात्मकङ्गलाचरणमाध्यमेन पूजयति। ग्रन्थस्य प्रयोजनं, रसभावादीनां वर्णनं, शृङ्गाररसस्य प्राधान्यं, शृङ्गारसहायकादीनां च विषये संक्षेपेण वर्णितम् ।

4.2 द्वितीयतरङ्गे नायिकानां भेदः विशदरूपेण रघुनाथदासेन वर्णितः ।

4.3 ग्रन्थस्य तृतीयतरङ्गे नायिकानाम् अलङ्काराणाम्, अनुरागाङ्कितानां द्वैतस्वभावानां च विषये वर्णितम् ।

4.4 चतुर्थतरङ्गे रसानां भेदं निरूप्य रससाररूपतया शृङ्गारस्य सम्भोगस्य च वर्णनं कृतम् ।

4.5 बृहत्काये पचमतरङ्गे पुरुषाणां स्त्रीणां च जातिविषये व्यापकरूपेण चर्चा तेन प्रदर्शिता ।

4.6 षष्ठतरङ्गे मुखवासविषये लिङ्गानां विषये स्तम्भनादिक्रियाणां विषये च तेन वर्णितम् । तत्र कामेश्वरमन्त्रादि –उद्धरणं तेन प्रदत्तम्। गर्भाधान-गर्भ संस्थापन-प्रसव-वन्ध्याकरणकेशसंस्कारादीनां विवेचनं कृतम् ।

4.7 सप्तमतरङ्गे सम्भोगक्रियारूपाणां बन्धानां सम्यक्तया प्रतिपादितं दृश्यते ।

5. अप्रकाशितग्रन्थानां विशेषतया तालपत्रमातृकाणां सम्पादनकर्मणि ये मां सर्वप्रथमतया प्रचोदितवन्त प्रशिक्षणं च प्रदतवन्तः ते भवन्ति प्रातःस्मरणीयाः मम गुरवः मार्गदर्शकाः डा. म. द. वालसुब्रह्मण्यम्महोदयाः। तेभ्यः सांजलि मदीयां हार्दिकीं कृतज्ञतां प्रकटयामि । अस्य ग्रन्थस्य सम्पादनार्थं ये मां साहाय्यं कृतवन्तः, ते भवन्ति मदीय शोधच्छात्रः डा. निरंजनकर, श्री सुरेशचन्द्रदासः, श्री जितेन्द्रकुमारदासः, श्री भगवान् साहुः, श्री वसन्तकुमार मिश्रः, सौदामिनी त्रिपाठी, स्नातकोत्तरविभागस्य छात्रे कुमारी सुचेता पण्डाः, कुमारी सुवासिनी पत्री च, तेभ्यः सश्रद्धं सस्नेहं धन्यवादान् विज्ञापयामि । मदीया पत्नी श्रीमति-सुवासिनीदेवी (सुभद्रा) ग्रन्थसम्पादनकर्मणि मम सहायिका भूय मां बहु प्रचोदितवती । साऽपि धन्यवादार्हा ।

—अद्वैतचरणधलः

द्वितीयभागः

मदनकेलीतरङ्गिण्याः संस्करणम्

ओ३म् श्रीकृष्णं वन्दे जगद्गुरुम्

प्रथमतरङ्गः

श्रीनृसिंहाय नमः

श्रीमन्नृसिंहचरणं शरणं विधाय
धीरालि-भूरि करुणावरुणालयं तम् ।
कौण्डुन्यजेन कविना रघुनाथनाम्ना
व्यातन्वते मदनकेलितरङ्गिणीयम् ।।

'प्रजनश्चास्मि कन्दर्पः' इति भगवद्गीतायां भगवद्वचनात्मकस्य भगवद्रूपत्वात् केलिप्रतिपादकग्रन्थोऽपि नानादरणीय इत्यत आरभ्यते ।

यदुक्तम्—

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।।१

संसार विषवृक्षस्य द्वे एव रसवत्फले ।
काव्यामृतरसास्वादु सङ्गमः सज्जनैः सह ।।२

इति ।

"स वासनानां सभ्यानां रसस्यास्वादनं भवेत् ।
निर्वासनास्तु रङ्गान्ते काष्ठकुड्याश्मसन्निभाः ।।३

इति । तत्र रसः—

विभावैरनुभावैश्च व्यभिचारिभिरेव च ।
व्यक्तीभूतः स्थायीभावो रत्यादी रस-संज्ञकः ।।१

तत्र विभाव—

रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः ।
आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ।।२

आलम्बनो नायकादिस्तमालम्य (म्ब्य ?) रसोद्गमात् ।
तत्र चन्दनरोलम्बऋताद्युद्दीपनं मतम् ।।३

तत्र नायक—

तेजश्चातुर्यधैर्य्यं-श्रुतमतिकरुणो-
त्साहशौर्य्यं तुरन्ति[1] (य्र्यानुरक्तिः ?)
स्वाचारत्यागकान्तिप्रियवचनकला-
क्षान्तिनीतित्रपावान् ।
दक्षः संगीत भाग्योत्कुलविनय यशः
शक्य (शिल्प[2] ?) लक्ष्मीः (क्ष्मी[3] ?) क्रियावान् ।
स्त्री-कामो (म्यो ?) यौवनाढ्यः कुतककुतमति-
र्नायकोऽयं प्रसिद्धः ॥ ४

चतुर्द्धा (र्धा ?) नायको धीरोदात्तो धीरोद्धतस्तथा ।
धीरादिललितो धीरप्रशान्ताद्दीप(न्तः चेति?) (भेदतः ?)।५

तत्र—

दृढ़व्रतो महासत्त्वः कृपावानविकत्थनः ।
गूढमानोऽतिगम्भीरो धीरोदात्तः स्थिरो मतः ॥६

मायावी चपलश्चण्डस्तथाहंकारसंयुतः ।
आत्मश्लाघारतो दृप्तो धीरैर्धीरोद्धतो मतः ॥७

स धीरललितो नेता निश्चिन्तो भोगलम्पटः ।
धीरप्रशान्तो गुणवान् दीप्तो विप्रो निगद्यते ॥८

ते चतुर्विधा—

प्रत्येकं दक्षिणो धृष्टश्चानुकूलः शठस्तथा ।

तत्र—

अनेक महिलातुल्यरागो दक्षिण उच्यते ॥ ९
कृतापराधं निःशङ्कतर्जितं चाप्यलज्जितम् ।
मिथ्यावाचं स्फुटे दोषे विद्यात् तं धृष्टनायकम् ॥१०
अनुकूलः स विज्ञेयोऽप्येकस्यां निरतस्तु यः ।
एकत्र बद्धभावो योऽन्यत्र बाह्ये कृतादरः ॥ ११
गूढ़विप्रियकारी स्यात् स शठः परिकीर्त्तितः ।

---

1 पाठ-र्शया नुरक्तिः, द्र.-सा. भू. पृ 143
2
3

एषां सहायाः—

बहुव्यापिनीतिवृत्तो (त्तो[1] ?)दैवयोगादुपस्थित:(तो[2]) ।।१२

किंचिद् गुणहीनः स्यात् पीठमर्दाभिधः सखा ।

एषां शङ्गारसहायाः—

शृङ्गारेऽस्य सहाया विटचेटविदूषकाद्याः स्युः ।।१३

भक्ता नर्मसु निपुणाः कुपितवधूमानभंजनाः शुद्धाः ।

तत्र—

सम्भोगहीनसम्पद्विटस्तु चेटः (धूर्त:[3] ?) कलैकदेशकः (ज्ञ:[4] ?) ।। १४

देशोपचार कुशलो वाग्मी मधुरोऽथ बहु भासतो (मतो ?) गोष्ठ्याम् ।

चेटीपुत्रश्चेटः—

कुसुमवसन्ताद्यभिधः कर्मवपुर्वंशी (वेष[5] ?) भाषाद्यैः ।। १५

हास्यकारः कलहरतिविदूषकः स्यात् स्वकर्मज्ञः ।

(अथार्थचिन्तन सहायमाह-

मन्त्री स्यादर्थ चिन्तायाम्............)

अथान्तःपुरसहायाः

.... अवरोधे तथा पुनः[6] ।

वामनश्च (शण्ड[7]) किरात म्लेच्छाभीरा शकार कुब्जाद्याः ।।१६

मदमूर्खताभिमानी दुष्कुलतैश्वर्यसंयुक्तः ।

सोऽयमनूढभ्राता राज्ञः शालः शकार इत्युक्तः ।।१७

अथ प्रसङ्गात् दूतानां शुभलक्षणमाह—

निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः ।। १८

कार्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथाविधाः ।

---

1 2 द्र. सा भू पृ 147

3 4 द्र. सा. भू. पृ 148

5 6 द्र. भू. पृ. 149

7 द्र. सा. भू. पृ. 149

तत्र—

उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् ।
सुश्लिष्टं कुरुते कार्यं निःसृष्टार्थस्तु स स्मृतः ।। १६

मितार्थभाषी कार्यस्य सिद्धिकारी मितार्थकः ।
यावत् भाषितसन्देशहारः सन्देशहारकः ।। २०

।श्री। इति श्रीमन्रघुनाथदासविरचितायां कामशास्त्रे मदनकेलितरङ्गिण्यां प्रथमस्तरङ्गः ।श्री।

□

द्वितीयतरङ्गः

अथ नायिका त्रिभेदा स्वीयाऽन्या साधारणा स्त्रीति ।
नायकः सामान्यगुणैर्भवति यथासम्भवैर्युक्ता ।।१

तत्र—

विनयार्जवादियुक्ता ग्रहकर्मपरा स्वीया ।
सापि कथिता त्रिभेदा मुग्धा मध्या प्रगल्भेति ।।२

तत्र—

उद्भिन्नकामविकृतिर्योवना मानकोमला ।
अतिलज्जावती वामा रतौ 'मुग्धा' प्रकीर्त्तिता ।।३

विचित्रसुरता 'मध्या' प्रभूतस्मरयौवना ।
अल्पप्रगल्भवचना स्वल्पलज्जावती मता ।।४

स्मरान्धा गाढ़तारुण्या समस्तरतिकोविदा ।
भावोन्नता दरव्रीडा 'प्रगल्भा' क्रान्तनायका ।।५

मध्याप्रगल्भयोर्भेदान्तराण्याह—

ते धीरा चाप्यधीरा च धीराधीरेति षड्विधा[1] ।

इति ते मध्याप्रगल्भे । तत्र—

प्रिय[2] सोत्प्रासवक्रोक्त्या मध्या धीरा ददेद्रुषा[3] ।।६

धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः ।
प्रगल्भा यदि धीरा स्याच्छन्नकोपा कृती सदा ।।७

उदास्ते सुरते तत्र दर्शयन्त्यादराद् बहिः ।
धीराधीरा तु सोनुष्ठ भाषितैः खेदयदमुम् ।।८

तर्जयेत्ताडयेदन्या प्रत्येकं (ता[4]) अपि द्विधा ।
कनिष्ठज्येष्ठ रूपत्वान्नायक प्रणयं प्रति ।।९

---

1 'षड्विधेति' मातृकायां वर्त्तते ।

2 'पिय' इति स्थाने प्रियं द्र. सा. द. पृ-119 का. 61

3 'ददेद्रुषा' स्थाने 'दहेद्रुषा' द्र. सा. द. पृ-119 का. 61

4 द्र. सा. द. पृ-121 का 64

अन्यां विभजते—

परकीया द्विधा प्रोक्ता परोढा कन्यका तथा ।

तत्र—

यात्रादिनिरतान्योढा कुलटा गलितत्रपा ॥१०
कन्यात्वजातोपयमा सल्लज्जा नवयौवना ॥

साधारणा विभुत्वाह—

धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका ॥ ११

निर्गुणानपि न द्वेष्टि न रमति गुणेष्वपि ।
वित्तमात्रं समालोक्य सा रागं दर्शयेद्बहिः ॥१२

कामसङ्गीकृतमपि परिक्षीणधनं नरम् ।
मात्रा निष्कासयेदेषा पुनः सन्धानकाङ्क्षगा ॥१३

तस्कराः पुण्ड्रका मूर्खाः सुखप्राप्तधनास्तथा ।
लिङ्गिनः च्छन्नकामाद्याष्टा[1] संप्रायेण वल्लभाः ॥१४

एषापि मदनायत्ता क्वापि सत्यानुरागिणी ।
रक्तायां वा विरक्तायामत्रपायां[2] सुदुर्ल्लंभम् ॥ १५

अवस्थाभिर्भवन्त्येना[3] एताः सर्वत्र दुर्ल्लभाः ।
स्वाधीनभर्तृका तावत् खण्डिताऽथाभिसारिका ॥१६

कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।
अन्या वासकासज्जा स्याद् विरहोत्कण्ठिता तथा ॥ १७

पुनः प्रकारान्तरेण नायिकालक्षणम्—

खण्डिता विप्रलब्धा च वासकसज्जाभिसारिका ।
कलहान्तरिता चैव तथैवोत्कण्ठिता परा ॥ १८

स्वाधीनभर्तृका चान्या तथा प्रोषितभर्तृका ।
सम्भोगे विप्रलब्धे च इत्यष्टौ नायिकाः स्मृताः ॥१९

तत्र स्वाधीनभर्तृकालक्षणम्—

यस्याः पतिर्मदनकेलिकलासु रक्तः
पार्श्वं न मुंचति न चाभिलक्षत्तदन्याम् ।

---

1 'अस्याः प्रायेण वल्लभा' इति द्र. सा. द. पृ 125 का 70

2 'विरक्तायां रतमस्यां सुदुर्लभम्' इति द्र. सा. द. पृ. 125 का 71

3 'अवस्थाभिर्भवत्यष्टावेता षोडषभेदिताः' इति सा. द. पृ. 126 का 72

सा सुन्दरी सकलसौख्यसुधानिधानं
स्वाधीनपूर्वपतिकेति वदन्ति सन्तः ।।२०

अपरंच—

यस्याश्चित्ररतिव्रीडा सुखात्ममदनालसम् ।
नोपयाति पतिः पार्श्वात्सा स्यात्स्वाधीनभर्तृका ।।२१

कश्चित्—

आश्लेषचुम्बनगते कुसुमादिदानैः
प्रेमाभरप्रणयकोमल चारुवाग्भिः ।
यस्याः सदैव मुखमन्तमित प्रियोऽस्ति
स्वाधीन भर्तृकपदे प्रकटीकृता सा ।।

खण्डितालक्षणम्—

निद्रावशाल्ल (ज्ञाल) सगतिः परिमिलिताक्षः
कान्ताङ्गसङ्गमजलक्षणलक्षिताङ्गः ।
यस्याः प्रयाति दयितोऽभिमुखं प्रभाते
सा खण्डिता निगदिता कुपिता कवीन्द्रैः ।। २२

अपरं च—

निद्राकषाय मुकुलीकृत ताम्रनेत्रा
नारी नखव्रणविशेषाविचित्रिताङ्गः ।
यस्याः कुतोऽपि पतिरेति गृहं प्रभाते
सा खण्डिता निगदिता कविभिः पुराणैः ।।२३

कश्चित्—

अनिद्रिताजनितरागविलोहिताक्षः
कान्ता नखव्रणविशेष विचित्रिताङ्गः ।
यस्याः प्रभातसमये गृहमेति कान्तः
सा नायिका निगदिता खलु खण्डितेति ।।

अथाभिसारिकालक्षणम्—

त्यक्तत्रपाऽभिसरति स्वयमेव कान्तं
दूत्याभिसारयति वा मदनेन मत्ता
गुप्ताभिसारचतुर सुरतार्थिनी सा
सा कीर्त्तिता कविवरैरभिसारिकेति ।। २४

अन्यच्च—

सालिना स्वेषु गात्रेषु मृत्तिकृतविभूषणा ।
अवगुण्ठनसंविता कुलटाभिसरेद्यदि ।। २५

विचित्रोज्ज्वलवेशा तु रणन्नूपुरकङ्कणा ।
प्रमोदस्मेरवदना स्याद्वेश्याभिसरेद्यदि ।। २६

मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।
आविद्धगतिसंचारा स्यात्प्रेष्याभिसरेद्यदि ।। २७

अन्यमते—

या पादुकागमनकालमपारयन्ती
पोढुं स्मरज्वरतयाऽपि पिपासितेव ।
निर्यातित वल्लभजनाधरपानलोभा
सा कथ्यते कविवरैरभिसारिकेति ।।

प्रसङ्गादभिसारिकास्थानानि कथ्यन्ते—

नद्यास्तीरो निविडवनान्तः
श्मशानभूमिर्भवनं च दूत्याः ।
संजीर्णदेवालयलग्नवाटी
क्षेत्राणि देशस्तमसाधनश्च ।। २८

इत्यादिदेशास्त्वभिसारयोग्याः ।
प्रोक्ताः कवीन्द्रैः सुरतप्रवीणैः ।। २९

अथ कलहान्तरिता लक्षणम्—

आपादगाढ़करुणाद्यपि चाटुकारः
प्राणेश्वरः कुपितया यया निरस्तः ।
नो वा श्रुतं प्रियवचो व्रजति स्वकान्ते
सन्तप्तया..........कलहान्तरिता च सेयम् ।। ३०

अन्यच्च—

चाटुकारमपि जोवितनाथं कोपितं समवधार्य पनर्याः ।

अन्यमते—

प्राणेश्वरं प्रणयकोपविशेषभीतिं
या चाटुकारमवधार्य विकुप्य याति ।
संतप्तितैमंदनवह्नि—शिखासहस्रै-
र्वाष्पाकुलोऽपि कलहान्तरितेति सा स्यात् ।।

अथ विप्रलब्धालक्षणम्—

कृत्वापि सङ्केतमनङ्गरङ्गे
यदन्तिकं न व्रजति स्वकान्ता ।
सा विप्रलब्धा कथिता कवीन्द्रैः
कोपेन शोकेन च पूर्णवेत्ता ।। ३१

अन्यमते—

अहरहरनुरागा दूतिकां प्रेष्य पूर्वं
ममसमभिधाय क्वापि सङ्केतकामा ।
न मिलति खलु यस्या वल्लभ दैवयोगात्
कथयति भरतस्तां नायिकां विप्रलब्धाम् ।।

अथ प्रोषितभर्तृकालक्षणम्—

यस्याः प्रवासमकरोद्रमणश्चिराय
शापा.......... मादपि पुनर्गुरुकार्ययोगात् ।
दुर्वारमन्मथ-महाज्वरवेपिताङ्गा
सा प्रोषितप्रियतमा परिकीर्त्तितेयम् ।। ३२

अन्यमते—

कुतश्चित्कारणाद्यस्यः पतिर्देशान्तरं गतः ।
दत्त्वा व्याधिभृशार्त्ता सा भवेत् प्रोषितभर्तृका ।।

अथवासकसज्जालक्षणम्—

स्रक्चन्दनादिकविभूषणभूषिताङ्गा
या वल्लभा गमनवर्त्मनि बद्धदृष्टिः ।।
तल्पगता रुचिरवासगृहे च शेते
सा कीर्त्तिता जगति वासकसज्जिकेति ।। ३३

अन्यमते—

या वासवेश्मपरिकल्पिततल्पमध्ये
ताम्बूलपुष्पवसनैः सुसमं च शय्या ।
कान्तस्य सङ्गमसुखं समवेक्ष्यमाना
सा कथ्यते कविवरै इह वाससज्जा ।।

जयदेवस्य—

सवेश्मनि सुकल्पिततल्पा भर्त्तुः समागमावधि विदधाना ।
तिष्ठति प्रिय समागममनोत्का साऽप्यङ्गना भवति वासकसज्जा ।।

अथोत्कण्ठिता लक्षणम्—

आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः ।
तदनागमदुःखार्त्ता विरहोत्कण्ठिता नु सा ।। ३४

अन्यमते—

दुर्वारदारुणमनोभवबाणपीडा
पर्याकुलाकलितमानसमावहन्ती ।
या स्वेदवेपथुघनो पुलका कुलङ्गी-
मुत्कण्ठितां वदति तां भरतः कवीन्द्रः ।।श्री।।

इति श्रीरघुनाथदासविरचितायां कामशास्त्रे मदनकेलितरङ्गिण्यां द्वितीयस्तरङ्गः ।।श्री।।

□

तृतीयस्तरङ्गः

अथ नायिकानामलङ्कारमाह—

यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः ।
अलंकारस्तत्र भावहावहेलास्त्रयोऽङ्गजाः ।।१

शोभा कान्तिः सुदीप्तिश्च माधुर्यं च प्रगल्भता ।
औदार्यं धैर्यमित्येव ते सप्तैव स्युरयत्नजाः ।।२

लीला विलासो विच्छित्तिविब्योकः किलकिंचितम् ।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ।।३

विहृतं पतनं मौग्ध्यं विक्षेपश्च कुतूहलम् ।
हसितं चकितं केलिरित्यष्टादशसंख्यकाः ।।४

स्वभावजाः स्युर्भावाद्या दश पुंसा भवन्त्यपि ।

तत्र भावः—

निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ।।५

हावः—

भ्रूनेत्रादिविकारैस्तु सम्भोगेच्छाप्रकाशकः ।
भाव एवाल्पसंलक्ष्य विकारो हाव उच्यते ।।६

हेला—

हेलात्यन्तसमालक्ष्य विकारः स्यात्स एव तु ।

शोभा—

रूपयौवनलालित्यं भोगादैरङ्गभूषणम् ।।७

कान्तिः—

सैव कान्ति रतविदैर्मन्मथाप्यायितद्युतिः ।

दीप्तिः—

कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते ।।८

मधुर्यम्—

अभूषणेऽपि रस्यत्वमार्यैर्माधुर्यमुच्यते ।

प्रगल्भः—

निःसाध्वसत्वं प्रागल्भ्यम्—

औदार्यम्—

औदार्यं विनयः सदा ।।९

धैर्यम्—

शीलाद्यलंघन यत्तद्धैर्यमार्यैरुदीर्यते ।

लीला—

अङ्गैर् वेशैरलंकारैः प्रेमिभिर्वचनैरपि ।।१०
प्रीतिप्रयोजितैर्लीला प्रियस्यानुकृतं विदुः ।

विलासः—

यान स्थानासनादीनां मुखनेत्रादिकर्मणाम् ।।११
विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना ।

विच्छित्तिः—

विच्छित्तिरल्पभूषाभिरपि रम्यत्वमुच्यते ।।१२

विव्योकः—

विव्योकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः ।

किलकिंचितम्—

स्मितशुष्करुदितहसितत्रासक्रोधशमादीनाम् ।।१३
साङ्कर्यं किलकिंचितमभीष्ट संगमजाद्धर्षात् ।

मोट्टायितम्—

तद्भाव भाविते चित्ते वल्लभस्य कथादिषु ।।१४
मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम् ।

कुटटमितम्—

केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् ।।१५
आहुः कुटटमितं चेति शिरः करविसूदनम् ।

विभ्रमः—

त्वरया हर्षरागादेर्दयितागमनादिषु ।।१६
अस्थानं भूषणादीनां विन्यासो विभ्रमो मतः ।

ललितम्—

सुकुमारतयाङ्गानां विन्यासं ललितं भवेत् ।।१७

मदः—

मदो विकारः सौभाग्ययौवनाद्यवलेपजः ।

विहृतम्—

वक्तव्यकालेऽप्यवचो व्रीडया विहृतं मतम् ॥१८

पतनम्—

पतनं प्रियविच्छेदे स्मरात्तेषोथि चेष्टितम् ।

मौग्ध्यम्—

अज्ञानादिव या पृच्छा प्रतीतस्यापि वस्तुनः ॥१६

वल्लभस्य पुरः प्रोक्तं मौग्ध्यं तत्तत्त्ववेदिभिः ।

विक्षेपः—

भूषणामर्द रचना वृथा विश्वगवेक्षणम् ॥२०

रहस्याख्यानमीषच्च विक्षेपो दयितान्तिके ।

कुतूहलम्—

रम्यवस्तु समालोके लोलता स्यात्कुतूहलम् ॥२१

हसितम्—

हसितं तु वृथा हासो यौवनोद्भेदसम्भवः ।

चकितम्—

कुतोऽपि दयितस्याग्रे चकितं भयसम्भ्रमः ॥२२

केलिः—

विहारे सह कान्तेन क्रीडितं केलिरुच्यते ।

अथ मुग्धाकन्ययोरनुरागेङ्गितानि—

दृष्ट्वा दर्शयति व्रीडां सम्मुखं नैव पश्यति ॥२३

प्रच्छन्नं वा भ्रमन्तं वातिक्रान्तं पश्यति प्रियम् ।

बहुधा पृच्छमानाऽपि मन्द मन्द[1] मयी मुखी ॥२४

सगद्गदस्वरं किंचित् प्रियं प्रायेण भाषते ।

अन्यैः प्रवर्त्तितां शश्वत् सावधानं[2] च तत्कथाम् ॥२५

---

1 "मन्दमन्दमधोमुखी"—सा. द. पृ—150, का. 112

2 "सावधाना"—सा. द. पृ—150, का—113 = 3· "विलोचनपथं"
—सा द. पृ—151, का—114

शृणोत्यन्यत्रदत्ताक्षी प्रिये वालानुरागिणी ।

अथ सकलानाम् अनुरागेङ्गितानि—

चिराय संविधे स्थानं कान्तस्य बहुमन्यते ।।२६
विलोचनगपं (पथं[1] ?) चास्य न गच्छत्यनलंकृता ।
क्वापि कुन्तल संख्यान संयमव्यदेशतः ।।२७

बाहुमूलं स्तनं[2] नाभिपङ्कजं दर्शयेत् स्फुटम् ।
आश्वासयति वाचाद्यैः प्रियस्य परिचारकान् ।।२८

विश्वासामात्यमित्रेषु बहुमानं करोति च ।
सखामध्ये[5] गुणान् वृत्तो स्वधनं प्रददाति च ।।२९

सुप्ते स्वपिति दुःखेऽस्य दुःखं धत्तो सुखे सुखम् ।
स्थिता दृष्टिपथे शश्वत् प्रियं पश्यति दूरतः ।।३०

आभाषते परिजनं ससुखं स्वरविक्रियाम् ।
यत्किंचिदीप संवीक्ष्य कुरुते हसितं मुहुः[3] ।।३१

कर्णकण्डूयनं तद्गत्कवरीमोक्षसंयमो ।
जृम्भते स्फटयत्यङ्ग बालमाश्लिष्य चुम्बति ।।३२

भाले तथा वयस्याय[4] रचयेत्तिलकक्रियाम् ।
अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते ।।३३

दर्शति स्वाधरं चापि ब्रूते प्रियमधोमुखी ।
न मुंचति च तं देशं नायको यत्र दृश्यते ।।३४

आगच्छति गृहं तस्य कापि व्याजेन केनचित् ।
दत्तं किमपि कान्तेन धृत्वाङ्गे मुहुरक्षते[5] ।।३५

नित्यं हृष्यति तद्योगे वियोगे मलिना कृशाः ।
मन्यते तच्छीलं तत्प्रियं मन्यते प्रियम् ।।३६

---

1 "स्तनौ"—सा. द, पृ—151, का. 114
2 "सखीमध्ये"—सा. द., पृ—151, का—117
3 मुधा—सा. द.. पृ. 151, का. 119
4 वयस्याया—सा. द, पृ. 151, का. 120
5 मुहुरीक्षते—सा. द. पृ 152, का. 123

प्रार्थयत्यल्पमूल्यानि सुप्ता न परिवर्त्तते ।
विकारान् सात्त्विकानस्य सम्मुखानाधिगच्छति[1] ।।३७

भाषते सुकृतं[2] स्निग्धमनुरक्ता नितम्बिनी ।
एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः ।।३८

मध्यव्रीडानि मध्यायाः श्रंसमानत्रपाणि च ।
अन्यस्त्रियाः प्रगल्भायास्तथा स्युर्वारयोषितः ।।३९

लेखप्रस्तापनैः[3] स्निग्धैरीक्षणैर्मृदु भाषणैः ।
दूती सम्प्रेषणैर्नार्या भावाभिव्यक्तिरिष्यते ।।४०

दूत्यश्च—

दूत्यः सखा नटी दासी धात्रेयी प्रतिवेश्मनी ।
बाला प्रव्रजिता कारुशिल्पिन्याद्याः स्वयं तथा ।।४१

दूती गुणानाह—

कला कौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः ।
माधुर्यनर्मविज्ञानं वाग्मिता चेति तद्दुणाः ।।४२

अथ प्रतिनायकः—

धीरोद्धतः स्वापकारी व्यसनी प्रतिनायकः ।

अथोद्दीपन विभावाः—

उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ।।४३
आलम्बनस्य चेष्टाद्याः देशकालादयस्तथा ।

अथानुभावाः—

उद्वृद्धि कारणैः स्वै खै बहिर्भावं प्रकाश्यन् ।।४४
लोके यः कार्यत्वपस्यानुभाव काव्य नाट्ययो ।

कः पुन रस इत्याह—

उक्ताः स्त्रीणामलंकारा अङ्गजाश्च स्वभावजाः ।।४५
तद्रूपाः सात्त्विकाभावास्तचेष्टा अपरा अपि ।

---

1 'सम्मुखी नाधि गच्छति'—सा. द. पृ. 152, का. 125

2 'सूनृतं स्निग्धामनुरक्ता'—सा. द. पृ. 152, का. 125

3 लेख्यप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः, सा. द. पृ. 153

तत्र सात्त्विकाः—

विकारा सत्त्वसम्भूताः सात्त्विका परिकीर्त्तिताः ।।४६

के त इत्याह—

स्तम्भरोमांच वैश्वर्यकम्पाः स्वेदो विवर्णता ।
अश्रु प्रलय इत्यष्टौ सात्त्विकाः परिकीर्त्तिताः । ४७

अथ व्यभिचारिणः—

निर्वेद ग्लानिशङ्काश्रमधृतिजडताहर्षदन्योग्रचिन्ता
त्रासेर्ष्या मर्षगर्वस्मृति मरणमदाः सुप्ति निद्रावबोधाः ।
व्रीडापस्मारमोहाः सुमतिरलसतावेगतर्कविहित्था
व्याध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदेते त्रयश्च।।४८

तत्र—

तत्त्वज्ञानोपदेशादेर्निर्वेदः स्वावमानिकम् ।
दैन्यचिन्ताश्रुनिःश्वास वैवर्ण्योच्छ्वसितादिकृत् ।।४९
निर्वेदोऽयम् ।

ग्लानिः—

रत्यागां समनस्ताप क्षुत्पिपासादि सम्भवा ।
ग्लानिर्निष्प्राणताकम्प कर्षानुत्साहितादिकृत् ।।५०

शङ्का—

परक्तौ यातमदोषाद्यैः शङ्कानर्थस्यतत्कृशम् ।
वैवर्ण्यकम्प चैश्वर्यं पर्ण्यलोकास्यशेषं कृत् ।।५१

श्रमः—

स्वेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः ।

धृतिः—

इष्टार्थलाभाच्च तथा चेतः स्थैर्यं धृतिर्भवेत् ।।५२

जडता—

अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शन श्रुतिभिः ।
अनिमिषनयन निरीक्षण तूष्णिं भावादयस्तत्र ।।५३

हर्षः—

हर्षस्त्विष्टावाप्तिर्मनः प्रसादोऽश्रु गद्गदादिकरः ।
दौर्गत्यादेरनौजस्य दैन्यमलिनतादिकृत् ।५४

शौर्यापराधादिभवं भवेच्चण्डत्वमुग्रता ।
ध्यानं चिंतादिगनाप्तेः (चिन्ता हितानाप्तेर) शून्यता
श्वासतापकृत् ।।५५

निर्घातविद्युदेस्त्रासः कम्पादिकारणः ।
ईर्ष्यात्विन्यगुणैर्विना मैद्धत्यादि सहिष्णुता ।।५६

दोषोद्योगो भूविभेदावज्ञाक्रोध क्षिण दिकृत् ।
गर्वो मदः प्रभावोऽश्रु विद्यासत्कृततादिजः ।।५७

अवज्ञा सविलासाङ्ग दर्शनाविनयादिकृत् ।
सदृश्य ज्ञानचिन्ताद्यै-र्भू समुन्नसदिकृत् ।।५८

स्मृति पूर्वानुभूनार्थविषयं ज्ञानमुच्यते ।
शराद्यै मरणं जीवत्यागोऽङ्गपतनादिकृत् ।।५९

सम्मोहानन्दसम्भेदो मद्यो मोहोपयोगजः ।
अमुना चोत्तमः शेते मध्यो हसति गायति ।।६०

मध्यम प्रकृतिश्चापि परुषं वक्ति रोदिति ।
सुप्तिर्निद्रामुपेतस्य विषयानुभवश्च यः ।।६१

कोपावेगभयग्लानिः सुखदुःखादिकारिका ।
चेतः समीलनं निद्रा श्रमक्लेशमदादिजा ।।६२

जृम्भाक्षामीलनाच्छ्वासगात्रभङ्गादिकारणम् ।
निद्रापगमहेतुभ्योऽवबोधश्चेतनागमः ।।६३

जृम्भाङ्गरङ्गनयनमीलनाङ्गावलोककृत् ।
धाष्ट्र्याभावो भवेत् व्रीडा वदनानमनादिकृत् ।।६४

मनोक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः ।
भूपातकम्पतापैविफेनलालादिकारकः[1] ।।६५

मोहोऽपि चित्तताभीतिदुःखवेगानुचिन्तनैः ।
घूर्णना गात्रपतनभ्रमणादर्शनादिकृत् ।।६६

नीतिमार्गानुस्मृत्यादेरर्थं निर्धारणं मतिः ।
स्मेरता धृतिसन्तोषौ बहुमानश्च तद्भवाः ।।६७

---

1 प्रस्वेदः—सा. द., पृ. 157

आलस्यं श्रमगर्भाद्यैर्जैह्यजृम्भासतादिकृत् ।
आवेगः सम्भ्रमः प्रोक्त इष्टानिष्ट समागमात् ।।६८

तर्को विचारः सन्देहो भ्रूशिरोऽङ्गुलिनर्त्तकः ।
भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ।।६९

व्यापारान्तरसंसक्तान्यथावभाषणविलोकनादिकारी ।
व्याधिज्वरादिर्वाताद्यैर्भूमीच्छोत्कम्पनादिकृत् ।।७०

चित्तसम्भ्रम उन्मादः कामशोक भयादिभिः ।
अस्थानहासरुदितगीतप्रलपनादिकृत् ।।७१

उपाया भावजन्मा तु विषादः सत्त्वसंशयः ।
निःश्वासोच्छ्वासकृत्तापसहायान्वेषणादिकृत् ।।७२

ईमे[1] नवापिरोत्सुक्यं कालाक्षेप सहिष्णता ।
चित्ततापत्वरास्वेद दीर्घनिःश्वसितादिकृत् ।।७३

माश्चर्यं द्वेषरागादेश्चापलत्वनवस्थितिः ।
तत्र भर्त्सनपारुष्य स्वच्छन्दाचरणादयः ।।७४

अथ स्थायिभावः—

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः ।
आस्वादांकुर विन्यासो भावः स्थायीति सम्मतः ।।७५

तद्भेदानाहः—

रतिर्हासश्च शोकश्च क्रोधोत्साहो भयं तथा ।
जुगुप्सा विषयश्चेत्थमष्टौ[2] प्रोक्ताः शमोऽपि च ।।७५

—इति श्रीरघुनाथदासविरचितायां कामशास्त्रे मदनकेलि तरङ्गिण्यां
तृतीयस्तरङ्गः

---

1 'इष्टावाप्तेरौत्सुक्यं'—सा. द., पृ. 171

2 'विस्मय'—सा. द., पृ. 182, परिच्छेद—3

□

चतुर्थस्तरङ्गः

अथ यद्यपि नवरसाः प्रसिद्धास्तथापि शृङ्गारस्यैव सरसतया परं स एवात्र निरुप्यते । यदुक्तं भोजराजेन—

शृङ्गारवीरकरूणाद्भुतहास्यरौद्र—
बीभत्सवत्सलभयानकशान्ता नाम ।
आम्नासिषुर्दशरसानपरे वयं तु
शृङ्गारमेव रसनाद् रसमाभनाम[1] ।।

इति । **अथ शृङ्गारः—**

शृङ्गार एव मधुरः परप्रह्लादको रसः ।
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ।।१

शृङ्ग हि मन्मथोद्भेदस्तदागमनहेतुकः ।
उत्तमप्रकृतिः प्रायो रसः श्रृङ्गार इष्यते ।।२

परस्त्रीं वर्जयित्वा तु वेश्यां चाननुरागिणीम् ।
आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायिकाः ।।३

चन्द्रचन्दनरोलम्बभूतादुद्दीपनं[2] मतम् ।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः ।।४

त्यक्त्वौग्रसरणालस्य[3] जुगुप्साव्यभिचारिणः ।
स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः ।।५

तद्भेदानाह—

विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः ।

तत्र विप्रलम्भः—

स विप्रलम्भो यत्रेष्टं रतिनोपेति विस्तरा ।।६

विप्रलम्भभेदमाह—

पूर्वरागात्मको मानो प्रवास करुणात्मकः ।
चतुर्द्धा विप्रलम्भो सीदुक्तः प्राचीनपण्डितैः ।।७

---

1 भोजराज

2 'रुताद्यु' (भूतादि स्थाने)-सा. द , पृ-186

3 'ग्रमरणा' (ग्रसरणा स्थाने)

तत्र पूर्वरागात्मको यथा—

श्रवणाद् दर्शनाद्वापि मिथः संतप्तरागयोः[1] ।
दशाविशेषो योऽप्राप्तौ पूर्वराग स उच्यते ॥८

श्रवणं तु भवेत्तत्र दूतवादीसखीमुखात्[2] ।
इन्द्रजाले च चित्रे च साक्षात् स्वप्ने च दर्शनम् ॥९

अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंलापाश्च ।
उन्मादोऽथ व्याधिर्जडता मृतिरिति दशास्य
कामदशाः ॥१०

रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते ।
जातप्रायं तु तद्वाच्यं चेतसाकांक्षितं तथा ॥११

वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याद्दूरतः ।
आदौ वाच्यः स्त्रियो रागः पश्चात्पुंसास्तदिङ्गितैः॥१२

नीलं कुसुमं मंजिष्ठा पूर्वरागोऽपि च त्रिधा ।

तत्र—

न चातिशोभते यन्नोपैति प्रेममनोगतम् ॥१३

तन्नील रागमाख्यातं यथा श्रीरामसीतयोः ।
कुसुम्भरागं तु प्राहुर्यदुपैति च शोभते ॥१४

मंजिष्ठारागमाहुस्तं यन्नोपैत्यतिशोभते ।

अथ मानः—

मानः कोपः स तु द्वेधा प्रणयेर्ष्या समुद्भवः ॥१५

द्वयोः प्रणयमानः स्यात् प्रमादे सुमहत्यपि ।
प्रेम्णः कुटिलगामित्वात् कोपो यः कारणं विना ॥१६

पत्युरन्यप्रियासङ्गे तुष्टेऽनुमिते श्रुते ।
ईर्ष्या मानो भवेत् स्त्रीणां तत्र त्वनुमितिस्त्रिधा ॥१७

उत्स्वप्नायित भोगाङ्कगोत्रस्खलनसम्भवा ।
सामभेदोऽथ दानं च नत्युपेक्षे रसान्तरैः ॥१८

---

1 संरूढरागयोः-सा. द., पृ-187

2 'दूतवन्दीसखीमुखात्'-सा. द., पृ-187

तद्भङ्गाय पतिः कुर्यात् षडुपायानिति क्रमात् ।
तत्र प्रियवचः साम भेदस्तत्सख्युपार्जनम् ॥१९

दानं व्याजेन भूषादेः पादयोः पतनं नतिः ।
सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम् ॥२०

रभसत्रासहर्षादेः कोपभङ्गो रसान्तरम् ।

अथ प्रवासः—

प्रवासो भिन्नदेशत्वं कार्याच्छापाच्च सम्भ्रमात् ॥२१

तत्राङ्गचेलमालिन्यमेकवेणीधरं शिरः ।
निःश्वासोच्छ्वासरुदितभूमिपातादि जायते ॥२२

अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशता रतिः ।
अधृतिः स्यादनालम्बस्तन्मयोन्माद मूर्च्छना: ॥२३

पूर्वानुवजाज्ञेया दशस्मरदशा ईहा ।

तत्र ईहेत्युपलक्षणं—

तेनैते मानेऽपि भवन्ति
भाभिभवनभूत इति त्रिधा स्यात्तत्रकार्यजः ।
सम्भ्रमो द्वियमानुष्य निर्घातोत्पतनादिजः ॥२४

अथ करुणः—

यूनोरेकतरस्मिन् गतवति लोकान्तरं[1] —
(पठितुं न (शक्यते)
विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः ॥२५

अथ सम्भोगः—

अनुकुलौ निषेवेते यत्रान्योन्यौ विलासिनौ ।
दर्शनस्पर्शनादीनि सम्भोग[2] उदाहृतः ॥२६

शृङ्गारकरुणबीभत्सरौद्रवीरभयानकैः ।
शान्तेनापि विरुद्ध स्यादिति प्राहुर्मनीषिणः ॥२७

इति श्री ॥

इति श्रीरघुनाथदासविरचितायां कामशास्त्रे मदनकेलितरङ्गिण्यां
चतुर्थस्तरङ्गः ।

---

1 ....पुनरलभ्य-सा. द. पृ-202

2 सम्भोगोऽयमुदाहृतः-सा. द. पृ-204

पंचमस्तरङ्गः

अथ पुरुषाणां स्त्रीणां च जातिमाह—

तत्र—

शशो मृगो वृषोऽश्वश्च पद्मिनी चित्रिणी तथा
शंखिनी हस्तिनी चेति स्त्रीपुंसोर्जातयः स्मृताः ।।१

तत्र शशपुरुषलक्षणम्—

मृदुवचनसुशीलः कोमलाङ्गः सुकेशः
सकलतनु सुवेशः सत्यवादी शशोऽयम् ।
वदति मधुरवाणीं नृत्यगीतानुरक्तो
द्विजगुरुजनभक्तो बन्धुयुक्तो धनाढ्यः ।।२

दीर्घाक्षाः स्थूलदेहालघुसमदशनालम्बकर्णाः सुवर्चो
ग्रीवायां जानुदेशे करकमलतले कालिमानं वहन्त्यः ।
स्वल्पाहाराः सुशौचा दिनमधिशयनाः ज्ञानवंतोऽमताद्याः
क्रीडावन्तो विनीताऽलघुप्रिय सुरताः पुण्यभाजः शशाः
स्युः ।।३

स्त्रीजितो गायकश्चैव मानी सत्यपरः सुखी ।
षडंगुलमितं लिङ्गं विभ्रदद्वेषः शशो मतः ।।४

मृगो यथा—

वदति मधुरवाणीं रक्तनेत्रोऽतिभीरु
श्चपलमतिः सुदेहः शीघ्रगामी मृगोऽयम् ।
वदति सदसि सत्यं नित्यमेव प्रियं च ।
तनुभुगपि सुधर्मोऽष्टांगुलं लिङ्गमाप्तः ।।५

वषो यथा—

बहुगुणबहुबन्धुः शीघ्रकामोन्नतांशः
कनकरुचिरदेहः कष्टवादी वृषोऽयम् ।
उपकृति परएव स्त्रीजितः श्लेष्मलश्चा—
ङ्गुलि दशपरिमाणं लिङ्गमाप्तो वलिष्ठः ।६

अश्व यथा—

कृशजठरकटीः स्याद्दीर्घनेत्राधरोष्ठः
श्रवणदशनकम्बर्वाजिनामा प्रसिद्धः ।
वदति सदपि मिथ्यां निर्भयः स्थूललिङ्गो
भवति धनसुलोभी कुत्सितं वेशमाप्तः ।।७

अपरं च—

कार्ये धृष्टा बलिष्ठाः शितसमदशनाः पीवरस्यावराक्षा
ग्रीवा बाहूरुदीर्घा परहितनिरताः सात्त्विकाः स्निग्धवाचः।
निर्ल्लज्जा चारुशीलाः पृथुतरगतयश्चण्ड सम्भोगरक्ता
अश्वालिङ्ग वहन्तो युवतिजनरतं भानुसंख्यांगुलिकम्[1] ।।८

अथ लिङ्गलक्षणम्—

लिङ्गं च त्रिविधं प्रोक्तं दीर्घं स्थूलं कृशं तथा ।
प्रत्येकं लक्षणं सम्यक् ज्ञातव्यं च मनीषिभिः ।।९

दीर्घलिङ्गे भवेद्दुखं स्थूललिङ्गे धनादिकम् ।
कृशे च सुखसौभाग्यं धनानि विजयस्तथा ।।१०

अथ स्त्री जातिमाह । तत्र पद्मिनी यथाः —

भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा
त्वविरलकुचयुग्मा दीर्घकेशी कृशाङ्गी ।
मृदुवचन सुशीला नृत्यगीतानुरक्ता
सुरुचिरतनुवेशा पद्मिनी पद्मगन्धा ।।११

किंच—

सम्पूर्णेन्दुमुखी विलोलनयना पीनस्तनी दक्षिणा
मृद्वङ्गी विकचारविन्दसुरभि निर्द्धौत हेमद्युतिः ।
अल्पाहाररता विलासकुशला माधुर्यवाणी गति-
र्लज्जालु गुरुदेवपूजनरता स्यान्नायिका पद्मिनी ।।१२

चित्रिणी—

भवति कुटिलकेशी नातिदीर्घा न खर्वा
तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी ।
कठिन कुचयुगाढ्या सुन्दरी बन्धुशीला
निखिलगुणविचित्रा चित्रिणी रक्तचित्रा ।।१३

---

1 भानुसंख्यांगुलिकम्—द्वादशांगुलिकम्

किंच—

श्यामा पद्ममुखी कुरङ्गनयना क्षीणोदरी वत्सला
संगीतागमवेदिनी वरतनुस्तुङ्गस्तनी शिल्पिनी ।
विद्याचाररता मतङ्गजगति नीद्यन् मयूरस्वना
विज्ञेया कविशेखर प्रणयिनी चित्तप्रिया चित्रिणी ।।१४

शंखिनी यथा—

दीर्घाकृतिश्चोत्पलदीर्घनेत्रा दीर्घाधरा दीर्घनितम्बदेशा
रेखात्रयालकृतकण्ठदेशा मानैकचित्ता खलु शंखिनी सा ।।१५

किंच—

तन्वङ्गी कुटिलेक्षणा लघुकुचा भोगामदावेशिनी
प्राया दीर्घकचा स्वभावपिशुना कष्टोपभोग्या रतौ ।
पिङ्गा लोलगतिश्च घर्घररवा रक्ता स्वरा ह्लादिनी
नानास्थाननखप्रदानरसिका सेय मता शंखिनी ।।१६

हस्तिनी यथा —

स्थूलाधरा स्थूलनितम्बदेशा स्थूलाङ्गलिः स्थूलकुचोरुयुग्मा ।
कामोत्सुका गाढरतिप्रिया च निबद्धरागा करिणी
मतेयम् ।।१७

किंच—

पीना ह्रस्वतनुर्भृशं मृदुगतिः स्थास्नुर्नमत्वन्धरा
स्तोका पिङ्गल कुन्तला पृथुकुचा लज्जाविहीनानना ।
विम्बोष्ठी बहु भोज्यपानकरता कष्टैक साध्यारतौ
श्यामाङ्गी करिदानगन्धवदना सा नायिका हस्तिनी ।।१८

गन्धविशेषः—

पद्मिनी पद्मगन्धा (च) क्षीरगन्धा च चित्रिणी ।
शखिनी मीनगन्धा च मदगन्धा च हस्तिनी ।।१९

निद्रा विशेषः—

पद्मिनी पद्मनिद्रा च शीघ्रनिद्रा च ।
शंखिनी घोरनिद्रा च गजनिद्रा च हस्तिनी ।।२०

वाग् विशेषः—

पद्मिनी पिकवाणी च स्निग्धवाणी च चित्रिणी ।
शंखिनी क्रूरवाणी च मेघनादा च हस्तिनी ।।२१

शोभाविशेषः —

पद्मिनी स्तनशोभाढ्या नेत्रशोभा च चित्रिणी ।
शखिनी कटीशोभाढ्या चोरू शोभा च हस्तिनी ।।२२

स्वल्पाहारा पद्मिनी च लघ्वाहारा च चित्रिणी ।
बह्वाहारा शखिनी हस्त्याहारा च हस्तिनी ।।२३

पद्मिनीशशयोरेव हय्युपस्थौ च षडंगुली ।
चित्रिणीमृगयोरेव तावष्यष्टांगुली मतौ ।।२४

शंखिनीवृषयोरेव भगमेढ्रो दशांगुली ।
हस्तिनीवाजिनोरेव तावपि द्वादशांगुली ।।२५

समे समरतं ज्ञेयं नीचमुक्तं व्यतिक्रमे ।
उच्चलिङ्गेऽधिकं ज्ञेयं नीचं चैव भगाधिके ।।२६

भगाधिका च या नारी नीचमेढ्रस्तु यः पुमान् ।
गाढबन्धेन रन्तव्या नारी तावत् वशी भवेत् ।।२७

पद्मिनी शशके तुष्टिश्चित्रिणी हरिणप्रियः ।
शंखिनी वृषभे प्रीति हस्तिनीं रमते हयः ।।२८

अथ पद्मिन्यादीनां रतौ विशेषमाह—

ब्रह्म[1] सेन्दु[2] शरक्षिसंख्यतिथयः कामं नालिन्याः रतौ
पौलस्त्योऽपि रसाष्ट भास्करतिथि प्रीता भवे चित्रिणी ।
रुद्रानङ्गतुरङ्गलोकतिथिभिः स्याच्छखिनी मोदिता
शेषाः स्यु- सुरतोत्सवेषु करणीजातेः स्त्रियः प्रीतये ।२९

अथ पद्मिन्यादीनां रतिकालविशेषमाह—

यामिन्याः कथितश्चतुर्थचरणः कामे नालिन्या रतौ
प्राचीनप्रहरे प्रयाति सुखितां चित्तप्रिया चित्रिणी ।
शखिन्याः समुदीरितः कविवरैर्यामस्तृतीयस्तथा
मातङ्गी द्रवतामुपैति नितरां नक्तं दिनस्यार्द्धयोः ।।३०

---

1 ब्रह्म-4, 2-इन्दु-1, 3-शर-5, 4-पक्ष-2
अर्थात् चतुर्थी, प्रतिपद् पंचमी द्वितीया तिथिषु

अथ प्रतिपदादितिथिषु रतिप्रकारमाह—

कंठं चाश्लिष्य गाढं शिरस्युरसि तथा चुम्ब्य चोष्ठं रदाग्रं —
रापीड्यापीड्य गाढं विरचिपुलकः पृष्ठतः पार्श्वयोश्च ।
दत्वा सूक्ष्मं नखाग्रं मृदुकरमुखैरंजयन्तो नितम्बं
प्राग्भावं कामयानाः प्रतिपदि सुरतौ नागरीं द्रावयन्ति ।।३१

स्तनहृदयमुखाब्जं गण्डपार्श्वं विचुम्ब्य
नयनकुचयुगेऽप्याकृष्य पार्श्वं नखाग्रैः ।
अधर मधु पिवन्तो बाहुमूले युवानः
कृतघनपरिरम्भा द्रावयन्त्यह्नि युग्मे ।।३२

तृतीयायां श्लिष्यन् निविडतरमाकृष्य पुलकं
मुहुर्बाहोर्मूलं मृदुलिखित पार्श्वः कररुहैः
भुजापीडं कण्ठे दशनवसनास्वादु निभृतं
स्तनामर्दं कुर्वन् त्वरितमवला शोथिलयति ।।३३

चतुर्थ्यामालिङ्ग्य स्फुटमलघुसं पीडितकुचं
दशन्तो विम्बोष्ठं नखलिखित वामोरुपलका ।
ददाना दोर्मूले नखरमसकृन्नीरजदृशः
शरीरे क्रीडन्ति स्मररसनदीनिर्झरजलैः ।।३३

पञ्चम्यां चिकुरांश्च दक्षिणकरेणाकृष्टा दंष्ट्वाधरं
धृत्वा चूचुकमेव चोत्पुल्लकितं जानुं निपीड्यापि च ।
षष्ठ्यां गाढतरं विचुम्ब्य वदनं मुष्ट्या च नाभितटं
घ्नन्नङ्गे निभृतं लिखेत् कररुहैरुर्वास्तटान्तं मुदा ।३५

मुदितमदनसद्मा दन्तवासं लिहाने
वदन कलितकर्णप्रान्तवक्षः कपोलः ।
कृतघनपरिरम्भः संस्कृतानङ्गरङ्गो
गमयति सुखभावं भाविनीं सप्तमेऽह्नि ।।३६

अष्टम्यां परिरभ्यकण्ठमसकृन्नाभि नखैं रंजयन् ।
दन्तैरोष्ठपुटं निपीड्य तु कटीं चुम्ब्येक्षणाच्चूयुकम् ।
नाभिमूल विलोकपाणिमधरं दंष्ट्वास्तनौ पीडयन्
गृह्णीयान् मदनालयं च विलिखेत्पार्श्वं नवम्यां तिथौ ।३७

ललाटमाचुम्ब्य नखैर्लिखित्वा शिरोरुहे संगतवामहस्तः ।
कटीतटोरुश्रुतिपृष्ठमध्य लिखन् दशम्यां परिबोधयन्ति ।।३८

एकादश्यां करजकलितग्रीवमालिङ्ग्य गाढं
स्मारं स्मारं दशन वसनं किंचिदास्वाद्यमानाः ।
घातं घातं हृदयमसकृत् मन्मथागारमुदा-
नङ्गबीडा सुकलितकराः कामिनीं दावयन्ति ।।३९

द्वादश्यां परिरभ्य गाढमसकृत्च्चुम्बन् कपोलस्थलीं
हस्तेनाकलयम् मनोभवगृहं ब्यादष्टदन्तच्छदं
चुम्बन् गण्डतटीं त्रयोदशतिथौ गाढं कुचौ पीड्यन्
कुर्याद्रावणमेव कामुकजनः कान्तां नखैः सलिखन् ।।४०

कन्दर्पारितिथौ विचुम्बितदृशो दोर्मूलम् च चम्नखी(अस्पष्ट)
मारागार निवेशित द्विपकरा क्रीडन्ति कान्ता तनौ ।
दर्शे पूर्णविधौ तु चुम्बितदृशो गाढं स्पृशन्तिः कुचौ
नामागार निवेशित द्विपकराः कुर्युः प्रियां कामिनीम् ।।४१

अथ चन्द्रकला समुद्देशः—

अंगुष्ठे चरणे च गुल्फनिचये जानुद्वये वस्तिके
नाभौ वक्षसि कक्षयोर्निगदिता कण्ठे कपोलेऽधरे ।
नेत्रे कर्णयुगे ललाटफलके मौलौ च वामभ्रुवा- (—ल ?)
मूर्द्धयाधश्चलनक्रमेण कथिताश्चान्द्रोकलाऽपि क्षयेत् ।४२

सीमन्ते नयनेऽधरे च गलके कक्षातटे चूचुके
नाभौ श्रोणितटे मनोभवगृहे जंघातटे पिण्डिके ।
गुल्फे पादतले तदंगुलतलेअंगुष्ठे च तिष्ठन्त्यसौ
वृद्धिक्षीणतया समं शशिकला पक्षद्वये पोषिताम् ।।४३

अथ चन्द्रकला चालनम्—

मौलौ कुन्तलकर्षणं नयनयोराचुम्बन गण्डयो—
र्दन्तेनाधरपीडनं हृदि हतं पुष्ट्या च नाभि शनैः ।
कक्षाकण्ठ कपोलमण्डलकुच श्रोणीषु देया नखाः
सीमन्ते लिखनं नखैरसिजे गृहणीत गाढं ततः ।।४४

कुर्वीताविरतं मनोभवगृहे मातङ्गलीलायितं
जंघाङ्गुष्ठपदोरुगुल्फहननं चान्योन्यतः कामिनोः ।
इत्येवं कथितं प्रदेशकलनादिन्दोः कलोद्दीपनं
कर्त्तव्यं च नरैर्नविस्तरभयादुक्तः प्रपंचोऽखिलः ।।४५

अथ चन्द्रकलाचालनोपयोगिचन्द्रकलानां षोडशानां नामान्याह—

पूषा यश सुमनसा रति प्रीतिस्तथा धृतिः ।
ऋद्धिः सौम्या मरीचिश्च तथा चैवांऽशुमालिनी ।।४६

अङ्गिरा शंखिनी चेति छाया सम्पूर्णमण्डला ।
तुष्टिश्चैवामृता चेति कलाः सोमस्य षोडशः ।।४७

प्रणवादिनमः प्रान्तै रेतन्मन्त्रैः स्मरं चालयन् ।
प्रतिपत्क्रममारभ्य द्रावयेत् कामिनीं नरः ।।४८

तद् यथा –

शुक्ल प्रतिपदि 'ओं पूषायै नमः' इति पादांगुष्ठे नखक्षतम् ।
द्वितीयायां 'ओं यशायै नमः' इति पादे ''
तृतीयायां गुल्मे 'ओं सुमनसायै नमः' ''
चतुर्थ्यां जानुद्वये 'ओं रत्यै नमः' ''
पंचम्यां वस्तिके 'ओं प्रीत्यै नमः' ''
षष्ठ्यां नाभौ 'ओं धृत्यै नमः' ''
सप्तम्यां वक्षसि 'ओं ऋद्‌ये नमः' ''
अष्टम्यां कक्षयोः 'ओं सौम्यायै नमः' ''
नवम्यां कण्ठे 'ओं मरिच्यै नमः' ''
दशम्यां कपोले 'ओं अंशुमालिन्यै नमः' ''
एकादश्यां अधरे 'ओं अङ्गिरायै नमः' ''
द्वादश्यां नेत्रयोः 'ओं शंखिन्यै नमः' (ओं पुस्तके नास्ति)
त्रयोदश्यां कर्णयोः 'ओं छायायै नमः' ''
चतुर्दश्यां कर्णयोः 'ओं सम्पूर्णमण्डलायै नमः' ''
पूर्णिमायां[1] फलके 'ओं तुष्ट्यै नमः' ''
दर्शे[2] मौलौ 'ओं अमृतायै नमः' ''
सर्वत्र नमः शब्दान्ते नखक्षतं दातव्यम् ।

किंच –

पाद गुल्फोरुदेशेषु स्तने कक्षे गले श्रुतौ ।
नखमत्र प्रदातव्यं भगे नाभौ च मर्दनम् ।।४९

---

1 अथवा पौर्णिमायां ललाटफलके 'ओं तुट्यै नमः'

2 दर्शे—मौलौ ओं अमृतायै नमः एतद्द्वयं न्यसेत्'

हृदये ताडनं मुष्ट्या दन्तेनाधरपीडनम् ।
गण्डे नेत्रे ललाटे च चुम्बनं कामुकैरिह ।।५०

अथालिङ्गन प्रकारमाह—

वृक्षारूढक संज्ञकं प्रथमतस्तस्माललतावेष्टितं
सिद्धार्थं तदनन्तरं विरचयेच्चोरूपगूढं ततः ।
ज्ञातव्यं तिलतण्डुलं रसविदामालिङ्गनं योषितां
क्षीरनीर पुरःसरं निगदितं तस्मात्तु लालाटिकम् ।।५१

एषां लक्षणमाह—

दोर्भ्यां समाकृष्य तु कण्ठदेशं पादेन पादं निभृतं निवध्य ।
मध्येऽन्तरालं यदि भाति कामी महीरुहारूढकसंज्ञकं तत् ।५२

गाढ समालिङ्ग्य पदं पदेन प्रासज्य कामी कुचदत्तवक्त्रः ।
आलिङ्गति प्रोल्लसिताङ्गयष्टिं ज्ञेयं लतावेष्टितमेवमेतत् ।५३

एकेन पादेन निवध्य पादमन्येन चाक्रम्य विदूरभागम् ।
आपीड्य दोर्भ्यामपि पृष्ठदेशं सिद्धार्थमालिङ्गनमेतदाहुः ।५४

कान्तो मनोजव्यथिताङ्ग यष्टेरापीडयेद्दूरुयुगं युवत्याः ।
उरूपघातेन कविप्रवीरैरुरूपगूढं तदिदं प्रदिष्टम् ।।५५

यद्बाहुवक्षोजघनेन गाढमनोन्य संसक्तशरीरयष्ट्योः ।
कान्तस्य दार्ढ्यं श्लथतामुपैति त्वालिङ्गनं
तत्तिलतण्डुलाख्यम् ।।५६

गात्रोपरिष्टादथ तन्वीमध्ये संनीयते यन्मिथुनं शरीरम् ।
कामाभिमानक्षतपूर्वलिङ्गमालिङ्गनं क्षीरजल प्रदिष्टम् ।।५७

अन्योन्य ससंगमुखं[1] वाहुनेत्रं ललाटं हृदय कपोलम् ।
आनन्दसन्दोहनिमीलिताक्षं ललाटिकं तत् प्रवदन्ति
सन्तः ।।५८

अथ चुम्बनस्थानम्—

गण्डस्थली मस्तकदन्तवासो ग्रीवा कुचोरःस्थल चूचुकाक्षि ।
आलिङ्गनानन्तरमेव यूनोः स्थानं तु चुम्बस्य वदन्ति
तज्ज्ञाः ।।५९

1 'च' संयोज्यम्

अन्ये तु—

मुखे स्तने ललाटे च कण्ठे च नेत्रयोरपि ।
गण्डे च कर्णचोश्चैव कक्षरू-भग-मूर्द्धसु ॥
चुम्बनस्थानमित्युक्तं विज्ञेयं कामुकैरिह ।

अथ चुम्बनाभिधानानि—

कपोलयुग्मं च नितम्बवत्याः कन्दर्परागात्तरुणप्रवीराः ।
चुम्बन्ति कामं तरलायताक्ष्यास् तच्चुम्बनं प्राहुरिदं
समानम् ॥६०

कान्तोऽङ्गनाया वदने स्वकीय—
माक्षिप्य वक्त्रं कुतुकेन यत्र ।
नो चुम्बति क्रोधवशेन नारी
तच्चुम्बनं त्वेकरसाभिधानम् ॥६१

पत्युर्मुखे स्ववदनं निवेश्य प्रेम्णा मनाक् पंचति चारुवक्त्रम्।
तनूरुहं गाढतरं निपीय रामाख्यमेतत् स्फुरितं वदन्ति ॥६२

कान्तापि नेत्रं परिमील्य भर्त्तुः
समीलिताक्षी वदने स्वजिह्वा ।
निक्षिप्य च क्रीडति यत्र लोला
ख्यातं रतज्ञैरिदमूर्ज्जसंज्ञम् ॥६३

हस्तांगुली संपुटकेन यत्र
कान्तोष्ठमादाय कृषानुरागा ।
पुनः पुनश्चुम्बति दन्तघात—
सृतेतदाहुः प्रतिताभिधानम् ॥६४

कान्तामुखं वाधरसंपुटेन पीत्वा मृदु स्वादयति क्रमेण ।
नारी च तेनैव विधानयोगात् ज्ञेयं मुनीन्द्रै रति
संपुटाख्यम् ॥६५

ओष्ठेन कान्तोष्ठयुगं निपीय जिह्वा निधायाप्यथतालुभागे।
चुम्ब्रोत्सवं नृत्यति यत्र नारी प्रोक्तं तदौष्ठ्यं मुनिभिः
पुराणैः ॥६६

अथ नखक्षत समुद्देशः—

कुक्षाकुचोरःस्थल कुक्षिनाभि—
श्रोणीललाटांघ्रिकरादिकं यत् ।
नखक्षतस्थानमिदं वदन्ति
ग्रीवाकपोलोरुयुगं तथैव ।।६७

अंगुष्ठ पूर्वांगुलिकैश्च सर्वै-
रव्यक्तबिम्बं स्तनकन्धरादौ ।
संस्थापनं मन्मथकेलिरागै-
रुक्तं मुनीन्द्रैः च्छुरिताभिधानम् ।।६८

वक्षोजकन्दर्पगृहाधरेषु कण्ठे कपोले युवतीजनानाम् ।
कण्डूयकेनैव शिरोरुहाणां केशोपयोगं परिकीर्त्तयन्ति ।।६९

अर्द्धेन्दु संकाशमिदं रतज्ञै रर्द्धेन्दुसंज्ञं परिकीर्त्तितं तत्
अर्द्धेन्दु तत्तछ्वयसंनिधानात् तत्कुण्डलांशं मदनावतंसम् ।।७०

सर्वांगुलि पृष्ठभवा च रेखा व्यक्तिकृता भाति नितम्बवत्याम्।
यत्रेदमाहुः कवयो रतिज्ञाः नखक्षतं स्वस्तिकमे (व)[1]
संज्ञम् ।।७१

सर्वस्वमेवास्ति मनोभवस्याऽप्यन्तोऽतिधीरेण नखक्षतानि ।
क्रियत बीजं ह्रीदमेव यस्मिन्नित्यादि शीतांशुकलापकेतुः ।।७२

अथ दन्ताघात समुद्देशः—

दन्त प्रकाराश्च नखप्रकारैर्देयास्तथैवेति वदन्ति सन्तः ।
वक्षोजगण्डाधरसंविभागो दन्तक्षतस्थानमिदं प्रसिद्धम् ।।७३

अथ केशग्रहसमुद्देशः—

भव्या घना रौक्ष विवर्जिताश्च
श्यामाः विशालाबहुलाः सुकेशाः ।
आकृष्यमाणा यदि चुम्बकाले
मथ्नन्ति दर्पं तरुणीजनानाम् ।।७४

---

1 'व' पुस्तके नास्ति

द्वाभ्यां कराभ्यां शिरसि प्रकामं
कृष्या कचं चुम्बति वल्लभश्चेत् ।
चुम्वप्रदानावसरे तदेवं
वदन्ति धीरास्त्वतिमस्तकाख्यम् ।।७५

("त्स्व" मातृकायाम्)

संवृत्य सर्वांगुलिभिः कथान्तं
यदा पतिर्धारयति स्मरार्त्तः ।
भुजङ्गवल्ली परिकीर्त्तितेय-
मुवाच शास्त्रादपि भोजराजः ।।७६

आकर्णवेशं परिपीड्यकेशं
प्रेम्णापतिं चुम्बति वल्लभा चेत् ।
अन्योन्य हस्तग्रहणक्रमेण
कान्तावतंसं मुनयो वदन्ति ।।७७

अथ स्त्री स्वभावः—

अवला वलिनं कान्तं रतिशास्त्रविनोदिनम् ।
न स्वं परं विजानाति रतिमिच्छति केवलम् ।।७८

सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदिवा सुतम् ।
योनिः क्लिद्यति नारीणां सत्यं सत्यं हि नारद ।।७९

स्याद्भोजनं द्विगुणमेव विलासिनीनां
बुद्धिश्चतुर्गुणमिता सकले च कृत्ये ।
सर्वत्र शड्गुणमिताध्यवसायचर्चा
पुंसोऽष्टधा वदति मन्मथरागवेगम् ।।८०

वह्निर्नशान्तिमुपयाति कदापि काष्ठै—
र्नाम्भोनिधिर्विरमति प्रचुरै वयोभिः ।
नाप्यन्तको जगनजन्तुभिरेति तुष्टिं
वामापि नैव पुरुषैरुपयाति तृप्तिम् ।।८१

सम्भोगकर्मणि सदा पुरुषैः कृतज्ञैः
स्थेयं ततः प्रभृति कण्डुहरं भगस्य ।
तत्प्रीतये निधुवनं प्रतिसेवनीय—
मारोग्य विश्रमणमत्र कृशोदरीणाम् ।।८२

कामश्चाष्टगुणो यस्मात् पुरुषं चेष्टते मुहुः ।
तस्माद्रक्षा विधातव्या कामशास्त्रार्थवेदिभिः ॥८३

एवं ज्ञात्वा तु पुरुषः क्षणमात्रं न तां त्यजेत् ।
अङ्के स्थितापि युवती कान्तमिच्छेत् नवं नवम् ॥८४

अथ प्रीतिकथनसमुद्देशः—

स्रक्चन्दनांशुकमनोहरभैक्ष्यभोज्यै—
र्नानाविधैरुपचिता विषयैः सदैव ।
प्रीतिः स्मृताविषजेति कविप्रवीरैः
सायुज्यते जगति सद् युवतो प्रकामम् ॥८५

सद् धूतशिल्पसुरपूजन केलिरङ्ग
संगीतसेवनविधावुपचीयते सा ।
अभ्यासकौशलवेशन विलासिनीना—
माभ्यासिकी निगदिता कविभिः पुराणैः ॥८६

अथ प्रीतिनाशसमुद्देशः—

दारिद्र्यशोक-भय-विक्लव-मानरागै—
रुद्वेग कोपतनुतादिभिरीश्वराणाम् ।
प्रायस्त्यजन्ति वनिता उह विस्तरस्य
भीत्या न चात्र कथितः सकलो विवर्त्तः ॥८७

अथ स्त्रीणां जातिकथनम्—

त्रिवलिवलितमध्या कम्बुकण्ठा विदष्टा
कमलविमलदेहा केतकी गर्भगौरी ।
शुचिरचितविचित्राशीलसन्तोषयुक्ता
सुललितपिकवाणी स्याद्दियं देवसत्त्वा ॥८८

हरिण चतुल दृष्टिर्नृत्यगीतादिदक्षा
जनितविविधतुष्टिर्गन्धमाल्यानुरक्ता ।
वदति मधुरवाणीं लीलया मोहयन्ती
रुचिर तनु सुवेशा सा तु गन्धर्वसत्त्वा ॥८९

गुरुकुचयुगभारा गौर देहातिदेहा
तरुणहरिणनेत्रा कामिनी वीतलज्जा ।

विविध मधुर मूर्त्तिर्मत्स्यमांसानुरक्ता
मुनिभिरियमनर्घ्या[1] यक्षसत्वा प्रदिष्टा ।।९०

विगत मदन चेष्टा रात्रिसंचारधीरा
मलिन पिशुन चित्ता कुत्सिताहारचेष्टा ।
विकृत वदननेत्रा कृष्णवर्णातिखर्वा
मलिनवसनरक्ता कीर्त्तिता प्रेतसत्वा ।।९१

अथ बालादिकथनम्—

बाला षोडशहायना च तरुणी संकीर्त्तिता त्रिंशता
प्रौढेति प्रवदन्ति तां कविवरा पंचाशतर्द्धैः पुनः ।
वार्द्धक्यं समुपैत्यतोऽधिकमिता वृद्धेति सा संमता
निन्दा सर्वकला विलासरहिता त्याज्या रसज्ञैर्नरैः ।।९२

बाला नूतनसंगमे रतिकरी सान्द्रान्धकारे भवे—
दालोके सुखमातनोति तरुणी सम्भोगलीलाविधौ ।
आलोकेऽपि सुखायते सरभसं प्रौढा तमिस्रेऽपि सा
वृद्धा जीवनहारिणी न कुरुते कुत्रापि सौख्यं मनाक् ।।९३

फलताम्बुलमालाभिर्बालावश्य ।भवेद् ध्रुवम् ।
नानाबन्धकृतैर्योषा तरुणी वशवर्त्तिनी ।।९४

चुम्बनालिङ्गनैर्गीतै रेतैः प्रौढा वशीभवेत् ।
सौरतैर्मधुरालापैर्वृद्धा हि वशगा भवेत् ।।९५

बाला तु प्रीतिदा प्रोक्ता युवती सुखदायिनी ।
प्रौढा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ।।९६

अध्वक्लान्ता रतिश्रान्ता नष्टपुष्या ज्वरार्दिता ।
षण्मासगर्भिणी मासप्रसूता न सुखायते ।।९७

अथ देशस्त्रीणां रतौ कालाः—

रुक्षा मेचकवर्णिनी चलमतिर्गीतप्रिया कोपिनी
शैलाम्भोनिधिपार्श्वदेशवनिता-प्रायो भवेदीदृशी ।
वर्षायां कुसुमाकरे च वहुशः सेव्या पुनः प्रीणिता
गुर्वाहार सुगन्ध माल्यवसना स्निग्धांगरागादिभिः ।।९८

---

1 'मुनिभिरिह्यमनर्घ्या' पुस्तिकायाम् ।

गूढग्रन्थिरहर्निशं च सकले गात्रे वहन्त्युष्णता—
मम्भोज प्रसवारुणोत्तमकरा गानैकदक्षा शुभा ।
सौराष्ट्री सुरसा कलिङ्गयुवती कामं भवेत् कामुकी
हेमन्ते शिशिरे नरैरनुदिनं सेव्या सुखाकांक्षया ।।९९

ज्ञेया कोकिलकाकलिकलरवा मन्दाकिनी शीतला
निद्रालुश्च शिरीषकोमलतनुः स्निग्धानना श्लेष्मणी ।
वङ्गश्रीहठकामरूपतरुणी गीतादि लास्यं विना
गन्तव्या शरदि प्रहृष्टमदना ग्रीष्मे नरैर्रादृता ।।१००

अथ देशभेदेन स्त्रीणां सुरतसमुद्देशः—

शुचिरचितविचित्रा चित्र सम्भोग मित्रा
नखदशन सुरक्ता शिल्पशिक्षानुरक्ता ।
अनुरतनिजबन्धुः काम सर्वस्य सिन्धु
भवति रुचिरवेशा कामिनी मध्यदेशा ।।१०१

विपुलघनकुचाढ्याश्लेषविन्यासदक्षा
सकलसुर (त) कक्षा ज्ञानवैदग्ध्यदक्षा ।
न लघु न गुरु वेशा कामलीलानुरक्ता
रमयति मधुराङ्गी कामिनी तैरभुक्ता ।।१०२

मृदुवचनविभागाकोमलारङ्गरागा
विविधरमणमेति कोकिलालापगीतिः ।
द्रवति झटिति कान्ता चित्तसम्भोगशान्ता
रमयति किल चौली कामिनी सा पि गौडी ।।१०३

करतलत्वतिपृष्टा वाह्यसम्भोगहृष्टा ।
चिरनिधुवनशीला मालवी धूर्तरम्या ।
सुखयति सुखवेशा व्यंजितानङ्गरागा
चपलपिशुन शीला स्यादियं सौरसेना ।।१०४

कुवलयदलवर्णा चारुताटङ्ककर्णा
चकितहरिणीनेत्रा फुल्लराजीववक्त्रा ।
लघुनिधुवनरक्ता बाह्यसम्भोगसक्ता
सुललितगतिवेशा गुर्जरी चारुयोषा ।।१०५

अलसवलितदृष्टिर्दिव्यरूपाङ्गयष्टिः
कठिनमदनवेगा दुःखसाध्यप्रयोगा ।
विरमति सुरतान्तं काममाक्रम्य कान्त ।
विविधसुरतिलोला सैन्धवा चारुशीला ।।१०६

सुतनुकरजदात्री चारुवाक्या विधात्री
विषमसुतनुपात्री चम्पवर्णस्वगात्री ।
इति भवति विदेहावन्ति पांचाल वामा
कनकघटकुचाढ्या कामरागाभिरामा ।।१०७

मृदुपिकवररावाः कमलाङ्गयः सुरम्यो
व्यपगतभयलज्जा कामलीलासु लज्जाः ।
लघुनिधुवनसाध्याः काशिसौवीरकान्ध्री
द्रविडमलयजातास्तुल्यरूपा युवत्यः ।।१०८

सकलसुरतवेश्याः प्रीति सौभाग्यहास्या
दशनवनयानप्रीतिभाजः सलज्जाः ।
करजलिखनदक्षा कामशास्त्रातिदक्षा
कमलविमलगन्धाः कुन्तला रट्टनार्यः ।।१०९

रतिरभसविमर्दं प्रेमवत्यः प्रचण्डाः
करजदशनरस्याः सर्वलोकातिकाम्याः ।
सहजमलिनचित्ता पौण्डकाम्भोजजाताः
करकलितनरेशाः कामरूपाङ्गनाः स्युः ।।११०

गीतं संश्लिष्यकण्ठे लिखति कररुहैः सर्वतः कान्तदेहे
केशेष्वाकृष्यचुष्यत्यधरसविरतं मुष्टिघातं ददाति ।
तृप्तिं नो याति भोगैर्द्रवति न च चिरं चण्डदेशाः प्रकामा
ज्ञातव्याः पण्डितेन्द्रैर्मरुवकयुवतीं भोटकर्णाटनारीम् ।।१११

दुष्टा दुर्गन्धदेहाः पशुसमसुरताश्चुम्बनाश्लेषहीनाः
सर्वा म्लेच्छाकुलाः स्युर्लघुसुरतरताः पार्वतीयाश्च नार्यः ।
काश्मरा धीरगन्धा रसकलमकला मोहहृद्याः सदैव
साध्या देशानुसारादिह पटुमतिभिः पण्डितैः सर्वदेव ।।११२

अथ रतिस्थाननिषेधः—

नद्यां देवगृहे चतुष्पथतटे हट्टे श्मशाने गिरौ
मान्याग्नि द्विजसन्निधौ परगृहे चात्यर्थ दु   वने। (अस्पष्टं)
सन्ध्यायां दिवसे कदापि सुरतं पुंभिर्विवेकोज्ज्वलैः
कार्यं नो कविशेखरेण भणितं सदा यत्नतः ।।११३

अथ रतिकालनिषेधः—

अष्टम्यां हिमरश्मिशेखरतिथौ वा पंचदश्यां तथा
भानोः संक्रमणे व्रते च शरदि ग्रीष्मे च पुण्येऽहनि ।
यातायातपरिश्रमे शुभदिने सम्भोगचेष्टां नरः
कुर्यान्नैव कदापि तात दिवसे प्राहुर्मुनीन्द्राः स्फुटाम् ।।११४

अथ रतिस्थानसमुद्देशः—

स्फूर्जद्दीपशिखोज्ज्वले सुललिते वास्फोजने प्रस्तरे
रूपोदारमनोहरे सुकुसुम स्रग्वर्म शोभान्विते ।
वीणातालवराकुले मनसिज प्रस्तावनामण्डिते
सम्भोगकुशलैः स्वकीयभवने कार्यो यथा कांक्षया ।।११५

अथ सुखसाध्या—

प्रौढ़ा कान्तविमानिता बहुगुणा रम्या स्मराध्वर्द्धिता
चण्डी चैकपरा स्वतन्त्रगमना निःस्वप्रिया गायिनी ।
षण्डोन्मत्त दरिद्र सेवकवधू रोगार्त्ति भिन्नाङ्गना
साध्या स्यात्सुखतो रतौ कृतिवरश्चेत्याह कामेश्वरः ।।११६

अथ त्याज्या—

अज्ञाता द्विजवल्लभा गुरुवधू मित्राङ्गना[1] रोगिणी
रण्डा प्रव्रजिता सती रिपुवधूः शिष्या च गर्भान्विता ।
बालघ्नी मृतसंततिः स्वजननी चास्युत्यजाः[2] पूजिता
गन्तव्या न कदापि धीरपुरुषैरेतास्त्रियः कामिभिः । ११७

अथ कन्यालक्षणम्—

न कृशा नाति गौरी च तन्वी मृदुपदा तथा ।
नाति पुष्टा नाति दीर्घा न ¯ नात्यल्पलोचना ।।११८
(अस्पष्टम्)

---

1 पुस्तिकायां नास्ति 'न' कारः

2 सन्देहः

मृदुस्निग्धशरीर च श्यामा चैत्र कृशोदरी ।
अल्पनिद्रा सुलज्जा च श्यामाङ्गी निम्ननाभिक ॥११९

समदन्ता चारुश्रोणी विम्बोष्ठी हंसगामिनी ।
दीर्घनेत्रा सुकेशी च गौराङ्गी च कलस्वना ॥१२०

शुकचंचुसमनासा सुकर्णा लोमवर्जिता ।
भवेत् कन्या प्रशस्ता सा धर्मकर्मार्थसिद्धये ॥१२१

आवर्त्ताङ्कचन्विता यस्यास्त्रिरेखा कण्ठसंस्थिता ।
यस्यास्तु लोचने रक्ते तां यत्नेन समुद्वहेत् ॥१२२

लालाटे तिलकं यस्याः कृष्णं (च) तिलमुत्तमम् ।
पंचमं जनयेत् पुत्रं धनं धान्यं च वर्द्धयेत् ॥१२३

ललाटे दृश्यते यस्यास्त्रिशूलं दैवनिर्मित्तम् ।
बहूनां स्त्री सहस्त्राणां स्वामिनीं तां समादिशेत् ।१२५

राजहंसगतिर्यस्या मृगाक्षी मृगकर्णिका ।
सूक्ष्माः समाश्च दशनास्तां कन्यां चोत्तमां विदुः ॥१२५

शशकाक्षी च या कन्या पद्मपत्रायतेक्षणा ।
तीक्ष्णनासा भवेत् या तु सा कन्या चोत्तमा स्मृता ॥१२६

अंगुल्यः संहता यस्या भूमौ सर्वा प्रतिष्ठिता ।
सुभ्रूः सुलोचना या तु सा कन्या सुखभागिनी ॥१२७

आवर्त्तो वामतो यस्याः कुक्षिदेशे विराजते ।
बहूनां स्त्री सहस्त्राणां स्वामिनीं तां विदुर्बुधाः ॥१२८

न स्थूला मृदुला शुद्धा तनुमध्या सुभाषिणी ।
अंकुशैस्तिलकैर्युक्ता सद्‌गुणं जनयेत् सुतम् ॥१२९

रक्तनेत्राधरोष्ठी च सा नारी सुखभागिनी ।
भ्रुवौ चन्द्रार्द्धसदृशावत्यन्तं सुखमेधते ॥१३०

गौरी श्यामा तथा कृष्णा स्निग्धाङ्गी कृष्णमूर्द्धजा ।
निम्ननाभिश्च सुश्रोणी सा विवाह्या प्रयत्नतः ॥१३१

शङ्ख कुन्देन्दुधवला यस्या दन्तावलिर्भवेत् ।
ऐश्वर्यभागिनी सा तु सामुद्रिको वचो यथा ॥१३२

दीर्घबाहु दीर्घमुखी दीर्घाक्षी दीर्घमूर्द्धजा ।
दीर्घनासा भवेत् या तु सात्यन्तं सुखमश्नुते ।।१३३

यस्यास्तु चरणौ स्निग्धौ भूमौ सम्यक् प्रतिष्ठितौ ।
सर्वलक्षणसम्पन्ना भोगिनी भोगदायिनी ।।१३४

यस्यास्तु गुणशालिन्या नाभ्यां वर्त्तः प्रदक्षिणः ।
मृद्वङ्गी वर्णसंयुक्ता दीर्घमाप्नोति सा सुखम् ।।१३५

कूर्मपृष्ठप्रतीकाशं यस्यास्तु सुभगस्थलम् ।
गजकुम्भसमं यस्याः सुभगं ता विनिर्दिशेत् ।।१३६

हंसस्वना तु या नारी पारावतसमस्वना ।
चक्रवाकस्वना या तु सा नारी सुखमेधते ।।१३७

विस्तीर्णे जघने यस्या वेदिमध्या च या भवेत् ।
आयते विपुले नेत्रे राजपत्नी च सा भवेत् ।।१३८

यस्याः पाणितले रेखा कोष्ठाकारं सतोरणम् ।
अपि नीचकुले जाता राजपत्नी च सा भवेत् ।।१३९

पद्मनालांकुशे छत्रं नन्दावर्त्तायवस्तथा ।
हस्ते च दृश्यते यस्या देवकन्यां तु तां विदुः ।।१४०

अंकुशं कुण्डलं चक्रं पाणिपादतले भवेत् ।
धन पुत्रवती कन्या सा योग्या पृथिवी-पतेः ।।१४१

यस्या पाणितले रेखा प्रसादतोरणाकृतिः ।
कन्या कनकगात्री या राजपत्नी च सा भवेत् ।।१४२

यस्याः कोकिलनादा च प्रसन्नहृदयानना ।
कन्या कमलपत्राक्षी बहुपुत्रवती भवेत् ।।१४३

कृष्णा स्निग्धा च या कन्या गौरी च सुमुखी तथा ।
स्निग्धाङ्गी स्निग्धवाणी च सा कन्या सुखमेधते ।।१४४

पीनस्तना पीनपदा त्वरितं न (च) गच्छति ।
पादलक्षगसम्पन्ना पुत्रिणी सुखमेधते ।।१४५

या तु कुंचितकेशी च मुखं यस्याः सुवर्त्तुलम् ।
नाभिश्च दक्षिणावर्त्ता सा नारी सुखमेधते ।।१४६

मृगाक्षी मृग मृद्वङ्गी मृगग्रीवा मृगोदरी ।
मत्तहस्तीगतिर्यस्या राजपत्नी च सा भवेत् ।।१४७

दीर्घगुल्फी च या नारी चम्पकाशोक सन्निभा ।
समदन्ता ताम्रनखा सा नारी सुखमेधते ।।१४८

पृष्ठावर्त्ता पतिं हन्ति नाभ्यवर्त्ता पतिप्रिया ।
कट्यावर्त्ता पुत्रवती भवेत् कन्या न संशयः ।।१४९

अथ कन्याविलक्षणम्—

विरलांगुलिका या तु छिद्रपादतला भवेत् ।
हीनाङ्गा चाधिकाङ्गा विषमाङ्गा च दुःखदा ।।१५०

जंघायामुत्तरोष्ठे च पृष्ठपार्श्वकरेषु च ।
यस्याः सुव्यक्तरोमाणि सा शीघ्रं विधवा भवेत् ।।१५१

यस्यास्तु कर्कशं गात्रं मुखं च तिलकान्वितम् ।
कपिला लोमशा या तु सा बन्ध्या विधवा भवेत् ।।१५२

भूमौ न पततौ पादौ मुखनासिकालोमिका ।
कनिष्ठा न स्पृशेत् भूमिं सा कन्या पतिघातिनी ।।१५३

मेघग्रीवा व्याघ्रमुखी स्थूलवक्त्रांऽघ्रि नासिका ।
दासीत्वं चैव सा याति सामुद्रिकवचो यथा ।।१५४

पारावताक्षी या नारी किंचिदायतलोचना ।
आत्मनः पुरुषं हत्वा परभर्त्तारमावहेत् ।।१५५

उद्ध्र्वप्रेक्षा च या नारी या नारी पार्श्वदर्शनी ।
उद्भ्रान्त चपलाक्षी च तां कन्यां परिवर्जयेत् ।।१५६

काकजंघा च या नारी सा चैव भोगवर्जिता ।
भर्त्तारं हन्ति सा शीघ्रं न चापत्यं प्रसूयते ।।१५७

पृष्ठं तु विकृतं यस्याः प्रलम्बौ चूचुकौ यदि ।
उदरं लम्बमानं च सा कन्या नित्यदुःखिता ।।१५८

जघने लोमशे यस्या मुखं च परिमण्डलम् ।
पुत्रं वा भ्रातरं वापि जारमिच्छति साङ्गना ।।१५९

यस्याः प्रदेशिनी पादेऽप्यंगुष्ठे न सदा भवेत् ।
कान्तविद्वेषिणी भूत्वा सा चैव व्यभिचारिणी ।।१६०

यस्यास्त्वनामिका पादे भूमिं (न) स्पृशते यदि ।
द्वितीयं पुरुषं हत्वा तृतीयमधिगच्छति ।।१६१

यस्या व्रजन्त्या जघनं सदा कटकटायते ।
साऽपि कन्या प्रयत्नेन वर्जनीया सदा बुधैः ।।१६२

स्थूलपादा च या नारी सर्वत्रापि च लोमशा ।
स्थूलहस्ता स्थूलमुखी सा कन्या दासिका भवेत् ।।१६३

त्रीणि यस्याः प्रलम्बन्ते ललाटमुदरं करः ।
त्रयस्तस्या विनश्यन्ति श्वशुरो देवरः पतिः ।।१६४

वयोऽधिका चानुचिता मातृनाम्नी सगोत्रजा ।
वरपूर्वा वर्जनीया पाराशरो वचो यथा ।।१६५

अथ वरलक्षणम्—

प्रशान्तः शुचिवंशजो गुणनिधिः संगीतसाहित्यवित्
शुद्धाचारपरः परो नववयो नाना कुटुम्बाश्रयः ।
अर्थी भोगरतिर्विशिष्टवचनो दाक्षिण्यशीलाश्रयो
जामाता जगतीतले कविवरैरेवं विधो वर्णितः ।।१६६

अस्य दूषणम्—

पापिष्ठो व्यसनी रुजा प्रतिहतो दूतप्रियो भिक्षुको
दुर्वादी च नपुंसकश्चलमतिर्वैदेशिकः कातरः ।
मूर्खो दुष्टकुलोद्भवश्च कृपणो वृद्धः परस्त्रीरतो
दूरादेषः प्रयत्नतः कृतिजनैस्त्याज्यः सदैवं वरः ।।१६७

अथ विवाह-समुद्देशः—

चातुर्वर्ण्यसमाहिता मुनिवरैरष्टो विवाहा स्त्रियो
ब्राह्म्यो दैवतकस्तथा निगदितो गान्धर्वपैशाचको ।
आर्षो राक्षसकस्तथासुर इति ख्यातोऽपरश्चाष्टमः
प्राजापत्य इमे विवाहविधयः प्रोक्ता मुनीनां मताः ।।१६८

आर्षो दैवतकः प्रजापतिरिमे ब्राह्म्यो द्विजानां पुन-
र्गान्धर्वः सहराक्षसेन कथितः क्षत्रस्य तैस्तैरपि ।
पैशाचासुरसंज्ञको निगदितो वैश्यस्य शूद्रस्य च
संक्षेपादिह वर्णितं क्रमवशात्पौराणिकं विस्तरम् ।।१६९

अथ परस्त्रीहरणनिन्दा—

अश्रद्धामुपहास्यतां मलिनतामर्थक्षतिं लाघवं
देहग्लानिमधोगतिं विकलतां धर्मक्षतिं दुर्गतिम् ।
इत्थं ये परदारकर्मनिरता लोकत्रयो निन्दिता
विन्दन्ते परमापदः सुखधिया दुःखं पुनः केवलम् ।।१७०

पौलस्त्यः सुरदैत्यमौलिमुकुट प्रोद्घृष्टो पादाम्बुजो
मैथिल्या हरणादवाप मरणं बाली च्युतो राज्यतः ।
पंचालि प्रति कामुकोऽतिनिभृतं भीमान्मृतः कीचक –
स्तस्मादन्यवधूर्नरैर्न मनसाऽप्युल्लंघनीया भुवि ।।१७१

चक्षुप्रीतिरुदीरिताः प्रथमतश्चित्तभ्रमः स्यात्ततः
संकल्पस्तदनन्तरं निगदितो निद्राविनाशस्ततः ।
वैराग्यं विषयेषु कीर्त्तित इतो व्रीडाविनाशस्ततः
संमोहो मनसोऽवशः प्रकटिताः कन्दर्प चेष्टा इति(च्छे)।१७२

इति श्री रघुनाथदासविरचिताया कामशास्त्रे
मदनकेलितरङ्गिण्यां पंचमस्तरङ्गः ।।श्रीः।।

□

षष्ठस्तरङ्गः

अथ दौर्गन्ध्य हरणम्—

हरितकी[1] लोध्र[2] मरिष्टपत्रं[3] सप्तच्छदं[4] दाडिमवल्कलं च ।
एषोऽङ्गरागः प्रमदाजनानां शरीरदौर्गन्धहरः प्रदिष्टः ।।१

हरितकी चन्दनमुस्थ[5] नागै[6] रुशीर[7] लोध्रामल[8] वारितुल्यै[9] ।
स्त्रीपुंसयो घर्मजगात्रगन्धं विनाशयाशु प्रविलेपनं तत् ।।२

हरितकी श्रीफलमूलयुक्ता[10] विम्बाफलं[11] पूति[12] करंजबीजम्[13] ।
कक्षादि दौर्गन्ध्यमपि प्रभूतं विनाशयत्याह स भोजराजः ।।१३

जम्बूफलं[14] विल्वतरोः प्रसूनं[15] दुग्धेन[16] तुल्यं मसृणं सुपिष्टम् ।
एतेन लिप्ते युवतीशरीरे घर्म[17] च न स्यादिति रन्ति देवः ।।४

सदाडिमं[18] तन्मधु[19] लोध्रपत्रैः[20] पिष्टैः समानैः पितुमर्दपत्रैः[21] ।
विलिप्या गात्रं तरुणी निदाघे दुर्गन्धघर्माम्बुचयं निहन्ति ।।५

सकेशरोषीर शिरीष लोध्रै श्चूर्णीकृतं गात्रविलेपनेन ।
ग्रीष्मे नराणां न कदापि देहे घर्मसुतिः स्यादिति रुद्रदेवः ।।६

अथ स्नानीया समुद्देशः—

सूक्ष्मैलजी[22]मूत[23]नखैः[24] सचूतैः स्वर्ण[25] रसापत्रक[26] संयुतैश्च ।
सौरभीकान्ति किलमूर्धजीनां स्नात्वा नरो विन्दति सर्वदैव ।।७

कविना प्रदत्ता टिप्पणी—

1 हरितकी-हरिद्रा, 2. लोध्र-लोधु, 3. अरिष्टपत्रं-निम्बपत्रम्,
4. सप्तच्छदं-छातिम्राना, 5. मुस्थ-मूथा, 6. नाग-नागेश्वर, 7. उशीर-वेणाचेर, 8. अमल-अँला, 9. वारितुल्य-कुरुवेलि, 10. श्रीफलमूल-वेलमूल, 11. बिम्बफल-कंडसि काकुडि, 12. पूति-पोड-चान्दिम्रामंजि,
13. करंजबीजम्-करंजमंजि, 14. जम्बुफलम्-जामुकोलि, 15. विल्वतरोः प्रसूनं-वेलफूल, 16. दुग्धेन-गाई दुधरे, 17. घर्म-धिमिरि, 18. दाडिम-डालिम्ब, 19. मधु-महु, 20. लोध्रपत्रै -लोधपत्र, 21. पितुनर्दपत्रं-निम्बपत्र 22. सूक्ष्मैल-अलाइच (गुजराती ?), 23. जीमूत-मुत्था,
24. नख-गन्धद्रव्य, 25. स्वर्णा—सुनारि, 26. रसापत्र-अँलापत्र

स्वर्णाम्बुदोशीर[1] रसायुतानां[2] पथ्यामयानां[3] च विलेपने च ।
स्नात्वा नरः सौरमङ्गमस्य चेक्कण्यमाप्नोति शिरोरुहस्य ॥८

पथ्या रसाला[4] मलकी[5] फलानां मांसीयुतानां[6] च विलेपनेन ।
सजम्बु[7] जीमूत[8]दलान्वितानां स्नायान्नरः सौरभकान्तिसिद्धैः ॥९

अथ सामान्याङ्गराग समुद्देशः—

हरितकी तोयदतुल्यभागैर्घनतरस्यापि चतुर्थभागः ।
तदर्धभागः कपितो नखस्य स्यादेशगन्धो मदनः प्रकाशः ॥१०

उशीर कृष्णागुरुचन्दनानि पत्राम्बुतुल्यानि[9] समानि पिष्ट्वा ।
एतानि गात्रेषु विलासिनीनां श्रीखण्डतुल्यं कथयन्ति गन्धम् ॥११

अथ सर्वोत्तम सुगन्धः—

लेयागुरुचन्दनामयशटीतोयाभयाकेशरे.[10]
पुक्कोशीर च तुष्य शैलज निशामांसीवचोलाम्बुदैः ।
कस्तूरेण मदेनमगन्धकरणैः सर्वैरमीभिः पुनः
कृत्वा नामलता रसेन वटिकां कार्यं जगन्मोहनम् ॥१२

अथ मुखवाससमुद्देशः—

रसालजम्बुफलगर्भसारः सकर्कशामाक्षिक संयुतश्च ।
स्थितो मुखान्ते पुरुषस्य रात्रौ करोति सौरभ्यमसौ मुखस्य ॥१३

चूर्णं मुराकेशरकोष्ठकानां प्रातर्दिनान्ते परिलेदि यस्तु ।
अप्यर्धमासेन मुखस्य वासः कर्पूरतुल्यो भवति प्रकामम् ॥१४

यः कुष्ठचूर्णं मधुनाघृतेन पिकाक्षबीजान्वितमत्तिनित्यम् ।
मासैकमात्रेण मुखस्य वासो गन्धायते केतकी पुष्पतुल्यः ॥१५

अथ बीजवर्धन समुद्देशः—

घृतेन मासप्रस्तुतेन भूयो यो भावयित्वा रविशोषितानि ।
क्षीरेण संशोच्य च भक्षयित्वा स याति नारीशतमुग्रवीर्यः ॥१६

---

1. अम्बुद-मुत्था, 2. रसा-अॅला, 3. पथ्या-हरिडा, 4. रसाल-आम्ब,
5. आमलकी-अॅला, 6. मांसी-जटामांसी, 7. जम्बु-जामुकोलि 8. जीमूत-मुत्था ।
9 पत्राम्बु-तेजपत्र
10 एकस्याक्षरस्यास्पष्टता (पठितुम्)

चूर्णं विदार्याः स्वरसेन सप्त विभावितं भास्कररश्मिजाले ।
मध्वाज्यसंमिश्रितमेवलेढि स याति नारी शतमुग्रवीर्यः ।।१७

यः सोऽङ्गनां समये तु तावत् यावन्नराणामुदरस्थमेतत् ।
शतावरी[1] वानर[2] गोक्षुराणां[3] गोरक्षमातङ्ग वलावलानाम् ।।१८

क्षीरेण चूर्णानि निपीय रात्रौ मथ्नाति दर्पं तरुणीजनानाम् ।
यः शल्लकीलावक पिंजलानां मांसं तथा वेश्मविहङ्गमस्य[4] ।।१९

हठेन सिद्धं सह सैन्धवेन खादन् वली स्यादिति रन्तिदेवः ।
गुंजाफलं मोक्षुरकं सवीजं तथा चटीं गोपयसा विपाच्य ।।२०

खजाहतं शर्करया प्रयुक्तं पीत्वा नरो हृष्यति सर्वरात्रम् ।
अश्वत्थफलमूलत्वक् शृङ्गी सिद्धं पयो नरः ।
पीत्वा शर्करया यौन रतौ चटकवत् भवेत् ।।२१

लघुशाल्मलीमूलेन तालमूलीं च चूर्णिताम् ।
सर्पिषा पयसा पीत्वा रतौ चटकवत् भवेत् ।।२२

वृद्ध शाल्मलीमूलस्य रसः शर्करया पिबेत् ।
एतत् प्रयोगात् सप्ताहाज्जायते रेतसोऽम्बुधिः ।।२३

शालं च मद्गुरं मत्स्यं मत्स्यमज्जां तथैव च ।
खादति प्रत्यहं यो वै स वली नात्र संशयः ।।२४

अक्ष योनिमुद्रिकरणम्—

निशार्द्धं य पङ्कजकेशरं निष्पिस्य देवद्रुमतुल्यभागम् ।
अनेन लिप्तं मदनातपत्रं प्रयाति संकोचमलं युवत्याः ।।२५

पिकाक्षिवीजेन विलिप्य योषान् मनोजगेहं नियमं च रन्ति ।
हठेन संकोचमलं तदङ्कं संप्राप्नुयादाह महेशनाथः ।।२६

सनालपद्म पयसा सुपिष्ट्वा दृष्टं समाङ्गा गुटिका विधेया ।
यस्या वराङ्गे निहताक्षणेन कन्येव सत्याह स मूलदेवः ।।२७

इक्ष्वाकुवीज[5] सहसादरेण पिष्ट्वा वराङ्गं परिलिप्यतेन ।
बहु प्रसूताऽपि हठेन नारी कन्या भवेत् संशय एव नास्ति ।।२८

---

1 शतावरी-छतावरी, 2 वानर-वाइडङ्कमंजि,

3 गोक्षुरा-गोखरा, 4. घरचटिग्रा

5 इक्ष्वाकुवीजम्—पितालाउर्मजि

इन्दीवर-व्याधि-वचोषणानां तुरङ्गगन्धामलयामिनीनाम् ।
लेपेन नार्या मदनातपत्र संकोचमायादिति भोजराजः ।।२९

मदनकथनसारैः क्षौद्रयुं क्तैर्वराङ्गं
शिथीतिलमपि यस्याः पूरितं भूय एव ।
भवति कठिनमुच्चैः कर्कशं कामिनीना-
मिति वदति महीयान् रन्तिदेवो महेन्द्रः ।।३०

अथ द्रावण-समुद्देशः—

सिन्दूर उं चाषलमाक्षिकानि तुल्यानि यस्या मदनातपत्रे ।
निक्षिप्य तासां सुरतप्रसङ्ग द्रागेवरेतश्च्युतिता मुपैति ।।३१

सपत्रउं चाफलघोपधूलीं गुडं तथामाक्षिकतुल्यभागम् ।
अमीभिरालिप्य पुनः स्वलिङ्गरति करोत्याशु विलासिनीनाम् ।३२

सटङ्गणक्षौद्र महेशवीजैः कर्पूरतुल्यैरुपलिप्य लिङ्गम् ।
रत्नाकरो यस्तु विलासिनीनां रेतप्रवाहं कुरुते हठेन ।।३३

अथ स्थूलीकरणं समुद्देशः—

सकुष्ठ[1] मातङ्गबलावलानां वचाश्वगन्धगजपिप्पलीनाम् ।
तुरङ्गशत्रो नवनीतयोगाल्लेपेन लिङ्गं समुषत्वमेति ।।३४

अथ दृढ़ीकरणम्—

हयारिपत्नी नवनीतमध्ये वचावलानागवलामलेश्च ।
लेपेन लिङ्गसहसैव पुंसां लोहोपमं स्यादिति भोजराजः ।।३५

अथ वीजस्तम्भनम्—

पुष्योद्धृतं श्वेतपिकाक्षबीजं कटितटे लोहित सूत्र बद्धम् ।
वीजच्युतं धारयति प्रसङ्गात् प्रोक्तः सदायं किलऽभोजराजः ।।३६

पीता निशायां पयसा नरेण शय्यातले शेलु फलस्य सज्जा ।
स्ततपनति[2] वीजं सहसा प्रचण्डं सेतुर्यथा निर्झरिणी प्रवाहम् ।।३७

---

1 कुष्ठ-कुढ़, मातङ्ग-नागेश्वर, बल-वाडिअॅला, अवला-प्रियंगु, वच-वच, अश्वगन्धा-अश्वगन्ध, गजपिप्पली-गलपिप्पली, तुरङ्गशत्रु-हयारिपर्णि, नवनीत-मइंपिलहुणी ।

2 पठितुमस्पष्टम्

कर्पूरकार्पास महेशवीजैर्वह्नीन्द्रवीजं पुरुषस्य रात्रौ ।
विलिप्य कान्ता जघनेन काम न लम्बते शुक्रमधः कदापि ।।३८

आदाय कृष्णोत्तरकाकजंघामूल शिताम्भोरुहकेशरं च ।
क्षौद्रेण पिष्ट्वा परिलिप्य नाभिं स्तम्भं नयत्याशु
मनोजवीजम् ।।३९

अथ तिलकम्—

शम्भुर्जलं च मधुकं कृतांजनं च
चव्यं समं निजशरीरमनेकपिष्टम् ।
आलेयनेक्षणविधौ तिलके कृते वा
यो सोऽयमेव भुवनानि वशीकरोति ।।४०

गोरोचना घुसृणं चन्दनभावित च
यस्याः सदैव तिलकं कुरुते वशीत्वम् ।
वात्स्यायनेन प्रमदा बहुधा जनानाम्
सौभाग्य कृत्यविषये प्रकटीकृतं च ।।४१

अथ चूर्ण समुद्देशः—

कृष्णोत्पल मधुकरस्य च पक्ष्मयुग्मं
मूलं तथा तगरजं शित काकजघाम् ।
यस्या शिरोगतमिद निहत हि चूर्णं
दासी भवेत् झटिति सा तु न चापि चित्रम् ।।४२

अथांजनम्—

देवी महोत्सवदिने किल कज्जलं यत्
सिद्धार्थकस्य च रसेन नरोत्तमाङ्गे ।
निष्पीडितं नरवरेण निशि श्मशाने
तन्नेत्रगं भुवनमेव वशी करोति ।।४३

तालीश कृष्णनगरैः परिलिप्य वस्त्रं
सिद्धार्थतैलसहितं घृतपट्टवस्त्रम् ।
पुंसः कपालफलके विनिपातनेन
तेनांजनेन वसतां किल याति लोकः ।।४४

अथ लेपनम्—

सव्येन पाणिकमलेन रतावसाने
यो रेतसानिभ जवेन विलासिनीनाम् ।
वामं विलिप्यति पदं सहसैव वश्या
सा तस्यैव भवति नात्र विकल्पभावः ।।४५

सम्भोगशेष समये निजकान्तनेत्रं
या कामिनी स्पृशति वामपदाम्बुजेन ।
तस्याः पतिः सपदि विन्दति दासभावं
शास्त्रेषु हे विकथितः किल योगराजः ।।४६

सिन्धूत्थमाक्षिक कपोल मलानि पिष्ट्वा
लिङ्ग विलिप्य तरुणीं भ्रमयेत् नरो याम् ।
साह्लादयत्यमरनायक कामिनीव
वात्स्यायनेन कथितः किल योगराजः ।।४७

अथ धूपः—

शृङ्गी वचानलदसर्जरसं समानं
कृत्वा तुटीं मलयजं च सुगन्धमिश्रम् ।
यो धूपयेन्निजगृहं वसनं शरीरं
तस्यैव दास इव मोहमुपैति सर्वः ।।४८

अथ मदनमन्त्रः—

मद मद पदगादौ नादयेति द्विवारं
तदनु च मदनेत्थं गै पदं त्रीं च पश्चात् ।
अथ च पदमुपास्ये नाम रूपाभिसंज्ञो
भवति मदनमन्त्रः स्वाहया संयुतोऽयम् ।।४९

कनक—रमूर्त्तिः कुण्डलाकृष्ट चापो
युवतिहृदयमध्ये निश्चलारोपिता यः ।
इति मनसि मनोजं ध्यायते यो जपस्थो
वशयति स समस्तं भूनत्वं मन्त्रशक्त्या ।।५०

शतपरिमित जापी वादयं सिद्धिदात्ता
दश दश कुसुमानां लोहितानां च मोहात् ।
इह तु सकल कार्यं वामहस्तेन कार्य—
मुमदिशति समीपे ज्योतिरीश स्वरूपः ।।५१

अथ चामुण्डामन्त्र समुद्देशः —

चामुण्डा प्रथमं जयेति कथितं सम्बोधने मोहय
ज्ञातव्यं वशमानयेति च पदं साध्यं द्वितीयान्तकम् ।
स्वाहान्तः प्रणवादिरेष कथितस्तन्त्रैर्महामोहनैः
सन्मन्त्रः कविसार्थसेवित पदोनास्मिन् द्वितीये भुवि ।।५२

दंष्ट्रा कोटिविसं कटारवदना सान्द्रान्धकारे स्थिता
खट्वाङ्गाशनिरुत दक्षिणकरा वामे च पाशं शिरः ।
शस्यपिङ्गलमूर्द्धजा भयकरी शार्द्दूलचर्माम्बरा
चामुण्डा शववाहिनी जपविधौ ध्येया सदा साधकैः ।।५३

जप्तो लक्षमसौ पलाशकुसुमै भग्नौ दशांसे हुतः
सिद्धि गच्छति वामकर्मविधिना निःसंशयं मन्त्रवित् ।
पुष्पं सप्तविधानमन्त्रितमिदं सिद्धि ददात्यादरात्
दत्तं रागवतां करोति वशतां इत्याह वागीश्वरः ।।५४

आकर्णांचित कार्मुको हरपदे विध्वन् हरं सायकै—
र्भानो मण्डल मध्यगो दयितया सानन्दमालिङ्गितः ।
प्रत्यालीढ़ सुदोर्जवा निभतनुर्भग्नः परेतासने
कन्दर्पो जपकर्मणि प्रतिदिनं ध्यायो नरैरीदृशः ।।५५

जप्त्वा वीरशतं कदम्बकुसुमं पुष्पं पलाशस्य तु
कृत्वा पचसहस्रहोमनियतं सिद्धि लभदाहृतः ।
ताम्बूलं कुसुमं सुगन्धमथवा वस्त्रं प्रदत्तं हठात्
सप्ताहाच्च तमेव सिद्धिमयते कामं जगन्मोहयेत् ।।५६

शम्भोरायतने चतुष्पथतटे नन्यां श्मशाने गिरौ
मध्ये मन्त्रवरः करोति वशतामष्टौ महासिद्धयः ।
वश्याकर्षण मोहमन्मथमनस्तम्भादयो हस्तगाः
प्रायः प्राकृतसिद्धयस्तु कति वा चेमे कवित्वादयः ।।५७

अथ कामेश्वरमन्त्रः—

ओं कारं प्रथमं नमो नम इति प्रोक्तं च तस्मात्पदं
चामुण्डो परिकीर्त्तितं हन हन ज्ञेयो च संज्ञा ततः ।
ज्ञातव्य वशमानयेति च पदं स्वाहा पदं मन्त्रिणा
मन्त्रोऽयं कविशेखरेण कथितः ख्यातो महासिद्धितः ।।५८

वक्त्रा शक्रशराशनातनयना सव्येतरेणांकुशं
वामेनापि करेण पाशमुरसि न्यस्तोत्तमाङ्ग स्रजा ।
व्यानिम्नारुकुचा करालवदना वह्नि प्रभामध्यगा
ध्येया जप्यविधौ नरैरिति सदा कामेश्वरी सिद्धये ।।५९

अथ अनिच्छाहरणम्—

क्षीरोदनं द्विजवराय पुनः प्रदद्यात्
पुष्योद्धृतं शितवलाचरणं कुभार्याः ।
पिष्ट्वा प्रदत्तमिति वैरिकृतामनिच्छां
निःसारयेद्दिवि मुहुर्विदित प्रभावः ।।६०

अथ स्तनोत्थापन समुद्देशः—

तैलं हठाद्दाडिमविल्वसिद्धं सिद्धार्थजं लेपनया नितान्तम् ।
नारी स्तनौ चारुतटौ स्वपीनौ कुर्यादसौ योगवरः सदैव ।।६१

श्रीपर्णिकायाश्च सकल्वसिद्धं तिलोद्भवं तैलवरं प्रदिष्टम् ।
अनेन वक्षोजयुगं सुपीनं प्रयाति वृद्धि पतितं च नार्याः ।।६२

अथ योनिदुर्गन्धहरणम्—

जातिप्रसूनं शितसर्षपानां तैलं त्वपि मेथिक चूर्णयुक्तम् ।
अभ्यङ्ग योगेन सदैव योनौ सौभाग्यमाप्नोति रतौ पुरन्ध्री ।।६३

अथ लोमनाशः—

भुजङ्गचूर्णं कटुतैलमध्ये स सप्तमादित्यकरे निधेयम् ।
तत्तैल योगेन विलासिनीनां लोमानि नश्यन्ति वराङ्गजानि ।।६४

नष्टपुष्यम्—

ज्योतिष्मती कोमलपत्रमग्नौ
पुष्पं जवायाः परिपाचितेन ।
गृहाम्बुना पीतमिदं युवत्याः
स्यात् पूर्वरूपं स्मरमन्दिरस्य ।।६५

दुर्वादलं तण्डुलकस्य भागं निघृष्यपिष्टं परिपाचयेति ।
तद् भक्षयित्वा वनिता प्रनष्टं पुष्पं पुनर्विन्दति पूर्वरूपम् ।।६६

अथ श्रोणित श्रावणम्—

धात्रीं च पथ्यां च रसांजनं च
कृत्वानि चूर्णं सकलं निपीतम् ।
अत्यन्तकल्योऽनिशमुग्रवेगं
निवारयेत्सेतुरिवाम्बुपूरम् ।।६७

अथ गर्भाधानम्—

सपिप्पली—केशर—शृङ्गवेरं
क्षौद्रं वचां गव्यघृतेन पीतम् ।
वन्ध्यापि पुत्रं लभते हठेन
योगोऽयमात्रेयमुनि प्रदिष्टः ।।६८

पुष्यार्क योगोद्धृत लक्ष्मणाया मूलं तथा वज्रतरोश्च पिष्ट्वा
अप्येकवर्णा पयसा निपीत स्त्रियाः स्मृत पुत्रकरं मुनीन्द्रैः ।।६९

पुष्योद्धृतं लाक्ष्मणमेवमूलं पुंसा निपिष्ट सकृत निपीतम् ।
क्षीरोदनं प्राप्य रति प्रसङ्गात् गर्भं विधत्ते तरुणी न चित्रम् ।।७०

या वीजपुरद्रुममूलमेकं क्षीरेण सिद्धं हविषा विमिश्रम् ।
हतौ निपीय स्वपतिप्रसङ्गाद्दीर्घायुषं सा तनुजं प्रसूते ।।७१

अथ गर्भस्थापनम्—

धात्रयांजनं सावरयष्टिकाख्यं त्रयहेन पीतं प्रमदा जलेन ।
सप्ताहमात्रं विनियुज्य नारी स्तभ्नाति (पुष्नाति?) गर्भं चलितं
न चित्रम् ।।७२

अथ प्रसवः—

जवातरोर्मूलमपि प्रयत्नादाकृष्य संस्तूय च पूर्वभागात् ।
आनीत—स्ये शिरसि प्रदानात् सा गर्भवत्यैव झटिति प्रसूते ।।७३

अथ वन्ध्या समुद्देशः—

पलाशक्षीरी द्रुमयोः फलानि पुष्पाण्यथ शाल्मलि पादपस्य ।
समेन मासार्द्ध दिनं पिवन्ति वन्ध्या भवेदामरणान्तमेव ।।७४

त्रैहायनं या गुडमत्ति नित्यं पालुप्रमाणं वनितार्द्धमासम् ।
जीवान्तक निश्चितमेवतस्या वन्ध्यात्वमुक्तं कविपुङ्गवेन ।।७५

अथ केशसंस्कारः—

तिल प्रसूनं सहऽसादरेण सगोक्षुरं गव्यघृतेन पीतम् ।
सप्ताहमात्रेण शिरः प्रलेपात् भवन्ति दीर्घाः प्रचुराश्च केशाः ।७६

सनीलिका सैन्धव पिप्पलीभि
घृताभियुक्ताभिरुपेत्य केशम् ।
क्रमेण शंख्योपममाशु कृत्स्नं
शिरोरुहं मेचकतामुपैति ।।७७

शतावरी कृष्णतिलेन युक्ता
गोरोचना काकमुखाभिधा च ।
अमीभिरालिप्य पुनः स्वकेशान्
करोति शुक्लानपि कृष्णवर्णान् ।।७८

विडङ्ग गन्धोत्पल गन्धयोगात् (पठितुमस्पष्टम्)
गोमुत्रसिद्धं कटुतैलमेतत् ।
अभ्यङ्गयोगेन शिरोरुहाणां युकादिलिखा प्रचुरं निहन्ति ।।७९

नीलीहरणम्—

यः कण्टकैः शाल्मलिपादपानां क्षीरेण पिष्ट्वा परिलिप्य वक्त्रम् ।
सप्ताहमात्रेण मुखस्य नीलीं निहन्ति कृष्णामिति रन्तिदेवः ।।८०

इति श्री रघुनाथदासविरचितायां कामशास्त्रे
मदनकेलितरङ्गिण्यां षष्ठस्तरङ्गः ।। श्रीः ।।

□

सप्तमस्तरङ्गः

अथ योनिलक्षणम्—

स्पर्शेन पङ्कजसमस्तरुणी जनाना—
मभ्यन्तरे च गुटिका कुल एव कोऽपि ।
योनिर्भवेद्दशवलि प्रकारावकीर्णो
गोजिह्विका सुखद कर्कशगर्भदेशः ॥१

किंच—

कूर्मपृष्ठगजस्कन्धपद्मकोषसमं तथा ।
अलोमसं सुविस्तीर्णं पचैते भगलक्षणम् ॥२

लोमसं जाड्यमत्युष्ण गोजिह्वासदृशं खरम् ।
इत्युक्तं कामशास्त्रज्ञै दुर्भगा भगलक्षणम् ॥३

शीतलं सुखदं प्रोक्तमुष्णं च मध्यमं स्मृतम् ।
अत्युष्णमसुखं चैव खरं प्राणहरं स्मृतम् ॥४

किंच—

मनोभवागार मुखे च नाड्य—
स्तिस्रो भवन्ति प्रमदाजनानाम् ।
समीरणा चान्द्रमसीति गौरी
विशेषमासामुपवर्णयामि ॥५

प्रधानभूता मदनातपत्रे समीरणा नाम विशेष नाडी ।
तस्या मुखे संपतितं नु वीजं तन्निष्फलं स्यादिति भोजराजः ॥६

या चापरा चान्द्रमसी च नाडी कन्दर्प गेहे भवति प्रधाना ।
सा सुन्दरी योषित सेव सूते साध्या भवेदल्परतोऽत्सवंश्च ॥७

गौरीति नाडी यदुपस्थगेहे प्रधानभूता भवति स्वभावात् ।
पुत्रं प्रसूते बहुरागयुक्ता कष्टोपभोग्या सुरते प्रदिष्टा ॥८

प्रसरणादेव पुनः प्रयत्नाद् व्यातापि योनिः श्लथतामुपैति ।
संलग्न जानुद्वयमध्ययोगाच्छ्लथापि संकोचमलं प्रयाति ॥९

अथ शृंङ्गारे षोडशवेश कथनम्—

उद्वर्तनं ततः स्नानं सुवस्त्रं केशबन्धनम् ।
माल्यं चैव शिरोरत्नं सिन्दूरतिलकं ततः ।।१०

नयनांजनकं चैव नासिका भूषणं तथा ।
कर्णयोर्भूषणं चैव कण्ठाभरणकं तथा ।।११

करयोर्भूषणं चैव कट्या कांचि निबन्धनम् ।
स्तनयोश्चित्रकरणं तथा च पादभूषणम् ।।१२

एभिः षोडशशृङ्गारैर्भर्त्तारं वशमानयेत् ।

अथ स्त्रीणां सुरतवर्द्धनभावकथनम्—

ताम्बूलैश्चन्दनैश्चैव सुखाढ्यैः पादसेवनैः ।।१३

स्वयं ताम्बूल दानैश्च हासोल्लासैर्मनोहरैः ।
कटाक्षैश्च प्रियालापैरालिङ्गन विबु स्वनैः ।।१४

पुरुषस्य हरेच्चित्तं दशभावैस्तु कामिनी ।

अथ पुरुषस्यालिङ्गनादि षोडश सम्भोग कथनम्—

आलिङ्गनं तु प्रथमं द्वितीयं चुम्बनं तथा ।।१५

तृतीये प्रिय सम्बादं नखघात चतुर्थके ।
पंचमे दन्तघातं च षष्ठे काम प्रवोधनम् ।।१६

सप्तमे कामचलनं मुष्ट्या हृद्धतिरष्टमे ।(अस्पष्टम्)
कुचाकर्षस्तु नवमे पार्श्वयोर्योतनं तथा ।।१७(अस्पष्टम्)

चपेटाघातनं नाभौ दशमे नाभिमर्दनम् ।
एकादशे ततः कुर्यात् कर्णयोर्मोटनं तथा ।।१८

द्वादशे तु ततः कुर्यात् कण्ठदेशे तु कूजनम् ।
त्रयोदशे चुम्बनं च अधरामृत भोजनम् ।।१९

चतुर्द्दशे ततः कुर्यात् वस्त्रसंकर्षणं तथा ।
ततः पंचदशे चैव भवेल्लिङ्ग प्रवेशनम् ।।२०

षोडशे चैव शृङ्गारकरणं पुरुषस्य तु ।
आलिङ्गनविहीनस्तु यः कुर्यात् सुरतोत्सवम् ।।२१

पशुरेव स विज्ञेयः कामशास्त्रविवर्जितः ।
मोहिता न भवेत् यावत् यावत् नोत्कण्ठिता प्रिया ।।२२

न जायते सुखोत्पत्तिः रसिके कर्परा इव ।

अथ बन्धसमुद्देशः—

कामप्रदो विपरीतो नागरो रतिपाशकः ।।२३

केयूर प्रियतोषैश्च ततः समपदस्तथा ।(अस्पष्टम्)
ततश्चैकपदो ज्ञेयः सम्पुटोद्ध्र्व··· सम्पुटः ।।(अस्पष्टम्)२४

ततस्तनभरश्चैव ततोऽनु रतिसुन्दरः ।
उरुपीडस्ततः कामचक्रस्त्रैविक्रमस्तथा ।।२५

वेष्टको हंसकीलकस्ततो लीलासनस्तथा ।
अष्टादश इमे वन्धा नारीणां सुखदायकाः ।२६

पुंसां सुखकराश्चैव कथ्यन्ते तेऽत्र च क्रमात् ।
द्वौ पादौ स्कन्धदेशस्थौ क्षिप्त्वा लिङ्गभगे तथा ।।२७

कामयेत् कामुकः प्रीत्या भवेत् कामप्रदो हि सः ।
पादमेकमुरौ कृत्वा द्वितीयं स्कन्ध संस्थितम् ।।२८

नारीं च कामयेत् कामात् बन्ध स्याद् विपरीतकः ।
उरुमूले परिस्थाप्य योषिदूरु युगं यदि ।।२९

ग्रीवां धृत्वा कराभ्यां च वक्ष्ये नागरिको मतः ।
पीडयेदूरुयुग्मेन कामुको यदि सुन्दरीम् ।।३०

रति पाशस्तथेत्याहुः कामिनीनां सुखावहः ।
स्त्री जंघे उरु सन्दिष्ट दोर्भ्यामालिङ्ग्य सुन्दरीम् ।३१

कामयेद् विपुल कामी बन्धः केयूर संज्ञकः ।
नाभि पादौ स्वहस्तेन संधार्य चालकं तथा ।।३२

स्तन्वोवीतमुखः कामी कामयेत् प्रियतोषणम् ।
हृदि योषित् पदं कृत्वा कराभ्यां धारयेत् कुचौ ।।३३

मुष्टिभिश्चालयेत् योनिं बन्धः समपदाभिधः ।
पादमेकमुरौ कृत्वा दोर्भ्यां संपीड्य यत्नतः ।।३४

पादमेकं तु शय्यायां बन्धश्चैकपदः स्मृतः ।
सम्प्रसार्य करौ पादौ स्त्रियाश्चुम्बित चूचुकः ।।३५

भगे लिङ्गं तु संयोज्य रमेत् सम्पुटको मतः ।
स्त्री पादौ सरलीकृत्वा भूमौ कुजानुकः (?) ।।३६

स्तनौ च हृदये कृत्वा रमते सोद्ध्वं-सम्पुटः ।
सजंघाद्वयवाहौ तु कृत्वा योषित् पदद्वयम् ।।३७

स्तनं धृत्वा रमेत् कामी बन्धः स्तनभरः स्मृतः ।
नारीपादद्वयं कामी धारयेत् कुचमण्डले ।३८

धृतकण्ठो रमेत् कामी बन्धोऽयं रतिसुन्दरः ।
नार्य ऊरुद्वयं धृत्वा कराभ्यां पीडयेत् कुचौ ।।३९

रमयेन्निर्भरः कामी बन्धोऽयमुरुपीडितः ।
धृत्वा वामकरेणोरुं स्वपादमुपरिस्थितम् ।।४०

दृढं च कामयेत् कामी स्मरचक्र प्रतिष्ठितः ।
उद्धृत्य पादमेकं तु कृत्वान्यं च पदं भुवि ।।४१

कुचाश्रितो रमेत् कामो बन्धस्त्रैविक्रमः स्मृतः ।
हृदि कृत्वा पादमेकमितरेणैव वेष्टयेत् ।।४२

कान्तं कुचाश्रितं नारी बन्धोऽयं वेष्टको मतः ।
नारी पादद्वयं कृत्वा कान्तस्योरुयुगोपरि ।।४३

कटिमान्दोलयेदेषः बन्धोऽयं हंसकीलकः ।
लिङ्गोपरि स्थिता नारी शय्यां कृत्वा पदद्वये ।।४४

हृदये दत्तहस्ता च बन्धो लीलासको मतः ।

अथ सुखरतिः—

भगे निक्षिप्तलिंगाग्रमालेति चुम्बति प्रियाम् ।।४५
रतौ सुखं च विज्ञेयं पुनः लिंगं, च चुम्बति ।

अन्यतममाह तत्र उत्तानबन्ध समुद्देशः—

उत्तानसुप्त प्रमोद रु मध्ये स्थितः पति कामयते प्रकामम् ।
द्वयोर्द्वयोः प्रीतिकरः प्रदिष्टो बन्धो नराणामितिनागरोऽयम्।।४६

स्कन्धे समाधाय पदे युवत्याः कान्तो यदा कामरसं तनोति ।
बन्धोऽयमुक्तः समुपोतसंज्ञः प्रयोजनीयश्च रतोत्सवेषु ।।४७

उत्तानसुप्तस्त्रिय एव जंघान्तः
संजंघोपरि सन्निवेश्य ।
उद्भ्राम भूय कटि सारमेतत्
स्यादेष बन्धो मदनप्रकाशः ।।४८

धृत्वा कराभ्यां जघने स्मरांन्तः (त्तः)
शय्यातले स्त्रीसुखसंप्रविष्टा ।
कुचौ पतिः पाणि युगेन धृत्वा
रमेत बन्धोऽयमुदीरिताक्षः ।।४९

एवं विधायाश्चरणं पृथिव्यां चोद्ध्वं तथा संपरिकल्प्य कान्तः
पद्भ्यां स्थितो हस्तयुगं च भूमौ स्त्रैविक्रमोऽयं किल बन्धराजः।।५०

नितम्बविम्बं किलनायकश्चेन्—
नार्या पुनर्हस्तयुगेन धत्वा ।
गल्फं विधाय स्थित एव तस्या
बन्धोऽप्यसौ चाटु कपोलकाख्यः ।।५१

ऊद्ध्वं समं प्रसार्य नार्याः पतिश्चेत् परिकल्पयेत् ।
दण्डायमानः सरलीकृतांगो ज्ञेयो रसज्ञैः मदनध्वजोऽयम् ।।५२

अथ पार्श्वबन्धसमुद्देशः—

एवं युवत्याः हृदये स्वपादं
तथैव तत्रान्यपदं निरस्य ।
प्रौढांगनावल्लभ एष बन्धः
ख्यातः पृथिव्यामुपवीतकाख्यः ।।५३

ऊद्ध्वं पतिर्मध्यगते युवत्याः
पार्श्वस्थितायाः परिरभ्य देहम् ।
अनन्य संसक्त निबद्धपादौ
धीरोचितः सम्पुट—नामधेयः ।।५४

अथोद्ध्र्वबन्ध समुद्देशः—

पद्मासनं संपरिकल्प्य भर्त्ता तत्रापरिष्टात् सरतां रमेत् ।
अन्योन्य कण्ठार्पित बाहुबन्धं पद्मासनाख्यं प्रवदन्ति धीराः।।५५

कान्तो नितम्बस्थित एव नार्याः श्रोणीं कराभ्यां यदि याति धृत्वा।
आस्फालयेत् सोऽपि कटी प्रबन्धं प्रोक्तो मुनीन्द्रैः रतिकी···
(अस्पष्टम्) बन्धः ।।५६

अथाधोमुखसमुद्देशः—

अधोमुखस्थां युवतीं रमेत तत् पूर्ववर्त्ति पशुतुल्य रूपः ।
भर्त्ताधिरं क्रीडति भावहीनः संदृश्यतेऽयं हरिणप्रबन्धः ।।५७

स्वयं स्वहस्ताश्रित जानुयुग्मा नम्रानना या तु मृगीव नारी ।
ऊद्ध्र्वस्थिते भर्त्तरि मल्लबन्धः प्रोक्तो मुनीन्द्रै रपि
चांगनायाः ।।५८

दन्तावलध्वगी तुरंगमानां क्रीडाप्रकारैश्च भवेत् प्रबन्धः ।
इत्थं रसज्ञै रनुपालनीय नोदाहृता विस्तरभीतितस्ते ।।५९

अथोद्ध्र्वमुख समुद्देशः—

प्रसार्य किंचिज्जघनान्तराल अन्योन्य संसक्त निबद्धबाहुः ।
निपीड्य नारी पतिमुरुसंस्थं रमेत्तादा व्यायतकं वदन्ति ।।६०

पादो युवत्या यदि कान्तहस्ते जानुस्थितश्चाथपरः पृथिव्याम् ।
कान्तकराभ्यामुपगृह्णयन्त्या ज्ञेयं रतिज्ञैः स रतं त्रिपादः ॥६१

अथ पुरुषायित बन्ध समुद्देशः—

सम्भोगतृप्तिर्म भवेद् युवत्याः
कान्तोपरिष्टाद्रमते च नारी ।
सुप्ते स्वकान्ते पुरुषायितं चेत्
कुर्यात् पुरन्ध्री पुरुषायितोऽयम् ॥६२

अधोमुखी कान्तहृदि प्रसुप्ता
द्वाभ्यां समालिंग्य हृदि प्रविष्टा ।
आशंगनावल्लभ एष विज्ञै—(अस्पष्टं पठितुम्)
बंन्धः प्रदिष्टो विपरीतपूर्वः ॥६३

अपुत्रिका या ऋतुयोगयुक्ता
गर्भालसा वा नवसूतिकाऽपि ।
क्षीणा नवोढ़ा ज्वरिता च नारी
वर्ज्या रतिज्ञैर्विपरीतबन्धे ॥६४

अथ संताडितम्—

वामा स्वभावो मदनस्य रागो
हस्तप्रहाराद्रतिमभ्युपैति ।
तस्माद् यथास्थानमसौ विधेयो
वरांगनायाः सुरतोपदेशे ॥६५

यदंगना कान्तहृदि प्रहारं
करोति मत्ता सुरतोपचारे ।
सन्ताडितं नाम वदन्ति तज्ज्ञा
विस्तीर्णहस्तेन पुनः प्रहारः ॥६६

संघृष्टमध्याङ्गुलि सम्प्रहारात् संजायते नागरनामधेयः ।
यच्चाङ्गुलिपृष्ठभवो विधातः प्रोक्तो मुनीन्द्रैः स तु विन्दुभावः॥६७

अथ शीत्कारम्—

भवति च यदि नारी प्रौढरागोपपन्ना
मृदु निधुवनयोगे चुम्बनानि प्रदाय ।
पिबति दशनवासः किंचिदुद्भ्राम्य भूयः
कपितमिति मुनीन्द्रैः शीत्कृतं रागकारि ।।६८

नवानुरागात् पृथुकामभावं सम्पाद्य नारीपुरुषौ चिरेण ।
जातानुरागौ रहसि प्रकामं सौगण मासादयतौ नितान्तम् ।।६९

एते प्रयोगानपि सर्वदैव सर्वत्र योज्याः सुरतौ रतिज्ञैः ।
काले च देशे च वराङ्गनायां व्यक्तिकृताः सुन्दरतां प्रयान्ति ।।७०

इति श्री रघुनाथदासविरचितायां
कामशास्त्रे मदनकेलितरङ्गिण्यां
सप्तमस्तरङ्गः ।।श्री।।
समाप्तोऽयं ग्रन्थः

ग्रन्थकर्त्रा उद्धृतानां ग्रन्थानां ग्रन्थकर्त्तॄणां च नामानि

क्र. सं.	नामानि	प्रथमतरङ्गः	पृष्ठा
1	भगवद्गीता		11
		द्वितीयतरङ्गः	
2	जयदेवः		19
		तृतीयतरङ्गः	
		चतुर्थतरङ्गः	
3	भोजराजः		29,56
		षष्ठतरङ्गः	
4	रन्तिदेवः		53,56
5	रुद्रदेवः		53
6	महेशनाथः		55
7	वात्स्यायनः		57,58
8	वागीश्वरः		62

अन्येषां ग्रन्थकर्त्तॄणां श्लोकाः रघुनाथदासेन उद्धृताः

1	काव्यशास्त्रविनोदेन		1 त पृ.	11
2	संसारविषवृक्षस्य	11	1 त पृ.	11
3	स वासनानां	12	1 त पृ.	11
4	अनिद्रिताजनिता	1	2 त पृ.	17
5	या पादुकागमन	८	2 त पृ.	18
6	प्राणेश्वरं प्रणय	6	2 त पृ.	18
7	अहरहरनुरागा	2	2 त पृ.	19
8	कुतश्चित्कारणाद्यस्या	4	2 त पृ.	19
9	या वासवेश्म	9	2 त पृ.	19
10	स वेश्मनि सु कल्पित	1[illegible]	2 त पृ.	19
11	दुर्वारदारुणमनोभव	5	2 त पृ.	20
12	शृङ्गारवीरकरुणा	10	4 र्थ पृ.	29
13	मुखे स्तने ललाटे च		5 त पृ.	40

श्लोक सूची

79	कर्णकण्डूयनं	32	3	24
80	कर्पूर कार्पास	38	6	57
81	कलहान्तरिता	17	2	16
82	कलाकौशल	42	3	25
83	काकजघा च या	157	5	50
84	कान्तं कुचाश्रितं	43	7	66
85	कान्तामुखं	65	5	40
86	कान्तापि नेत्रं	63	5	40
87	कान्तापि नेत्रं	63	5	40
88	कान्तोऽङ्गनाया	61	5	40
89	कान्तो नितम्ब	56	7	68
90	कान्तो मनोज	55	5	39
91	कामयेत् कामुकः	28	7	65
92	कामयेद्विपुल	32	7	65
93	कामसङ्गीकृत	13	2	16
94	कामश्चाष्टगुणो	83	5	43
95	कार्य घृष्टा	8	5	33
96	कुक्षा कुचोरः	37	5	41
97	कूर्मपृष्ठगज	2	7	63
98	कूर्मपृष्ठ प्रती	136	5	49
99	कुचाश्रितो रमेत्	42	7	66
100	कुर्वीताविरतं	45	5	37
101	कुवलयदलवर्णा	105	5	45
2	कुसुमवसन्त	15	1	13
3	कृत्वापि संकेत	31	2	19
4	कृशजठर	7	5	33
5	कृष्णा स्निग्धा	144	5	49
6	कृष्णोत्पल	42	6	57
7	केयूर प्रियतोषं	24	7	65
8	कोपावेग	62	3	27
9	क्षीरेण चूर्णानि	19	6	55
10	क्षीरोदनं द्विज	60	6	60

"द"

"ध"

"न"

"प"

227	पद्मिनी शशके	28	5	35
28	पद्मिनी शशयो	24	5	35
29	परकीया द्विधा	10	2	66
30	परस्त्रीवर्ष	3	4	29
31	पलाशक्षीरी	74	6	61
32	पशुरेव य	22	7	65
33	परोक्तौ	51	3	26
34	प्रच्छलंन्नवा भ्रमन्तं	24	3	23
35	प्रणवादि नमः	48	5	38
36	प्रत्येकं	9	1	12
37	प्रधानभूता	6	7	63
38	प्रशान्तः शुचि	166	5	51
39	प्रसरणादेव पुनः	9	7	63
40	प्रसार्य किंचिज्जघना	60	7	68
41	पादगुलफोरु	49	5	38
42	पादो युवत्या	61	7	69
43	पादमेकन्तु	35	7	66
44	पापिष्टोव्यसनी	167	5	51
45	पारावताक्षी	155	5	50
46	प्रार्थयत्यल्प	37	3	25
47	पिकाक्षीबीजेन	26	6	55
48	पीतानिशायां	37	6	56
49	पीनस्तना	145	5	49
50	पीना ह्रस्वा	18	5	34
51	प्रीतिप्रयोजितै	11	3	22
52	पुंसां सुखकरा	27	7	65
53	पुरुषस्य हरेच्चित्तं	15	7	64
54	पुष्यार्क योगोदृत	69	6	61
55	पुष्योद्धृतं लाक्ष्मण	60	6	61
56	पुष्योद्धृतं श्वेत	36	6	56
57	पूर्वरागात्मको	7	4	29
58	पूषायशा	46	5	38
59	पृष्ठावर्त्ता पति	149	5	50

"ह"

□

उद्धृतानामन्येषां ग्रन्थकर्त्तृणां श्लोकानामनुक्रमणिका

क्र.सं.	श्लोका:	श्लोकसंख्या	तरङ्ग:	पृष्ठा:
1	अनिद्रिताजनिता		2	17
2	अहरहरनुरागा		2	19
3	काव्यशास्त्रविनोदेन		1	11
4	कुतश्चित्कारणाद्यस्या:		2	19
5	दुर्वार दारुण		2	20
6	प्राणेश्वरं प्रणय		2	18
7	मुखे स्तने ललाटे च		5	40
8	या पादुकागमन		2	18
9	या वासवेश्म		2	19
10	शृङ्गारवीरकरुणा		4	29
11	संसारविषवृक्षस्य		1	11
12	सवासनानां		1	11
13	सवेश्मनि सुकल्पित		2	19

पारिभाषिक शब्दावली

	पारिभाषिकशब्दा:	तरङ्ग:	कारिका संख्या	पृष्ठा:
1	रस:	1	1	11
2	विभाव:	1	1	11
3	अनुभाव:	1	1	11
4	व्यभिचारिभाव	1	1	11
5	स्थायिभाव:	1	1	11
6	रत्यादि:	1	1	11
7	आलम्बन	1	2	11
8	उद्दीपन:	1	2	11
9	नायक:	1	4	12

106	ग्लानिः	3	48	26
7	शङ्का	3	48	26
8	श्रमः	3	48	26
9	धृतिः	3	48	26
10	जडता	3	48	26
11	हर्षः	3	48	26
12	दैन्यम्	3	48	26
13	उग्रः	3	48	26
14	चिन्ता	3	48	26
15	त्रासः	3	48	26
16	ईर्ष्या	3	48	26
17	अमर्षः	3	48	26
18	गर्वः	3	48	26
19	स्मृतिः	3	48	26
20	मरणम्	3	88	26
21	मदः	3	48	26
22	सुप्तिः	3	48	26
23	निद्रा	3	48	26
24	अवबोधः	3	48	26
25	व्रीडा	3	48	29
26	अपस्मारः	3	48	26
27	मोहः	3	48	26
28	सुमतिः	3	48	26
29	अलसता	3	48	26
30	आवेगः	3	48	26
31	तर्क	3	48	26
32	अवहित्या	3	48	26
33	व्याधिः	3	48	,,
34	उन्मादः	3	48	,,
35	विषादः	3	48	,,
36	उत्सुकः	3	48	,,
37	चपलता	3	48	,,

138	विप्रलम्भ:	4	6	26
39	सम्भोग:	4	6	,,
40	पूर्वराग:	4	7	,,
41	मान:	4	7	,,
42	प्रवास:	4	7	,,
43	करुण:	4	7	,,
44	नीलम्	4	13	30
45	कुसुमम्	4	13	,,
46	मञ्जिष्ठा	4	13	,,
47	शश:	5	1	32
48	मृग:	5	1	,,
49	वृष:	5	1	,,
50	अश्व:	5	1	,,
51	पद्मिनी	5	1	,,
52	चित्रिणी	5	1	,,
53	शङ्खिनी	5	1	,,
54	हस्तिनी	5	1	,,
55	भाविनी	5	36	36
56	वृक्षारुढ़कम्	5	51	39
57	लतावेष्टितम्	5	51	,,
58	सिद्धार्थम्	5	51	,,
59	उरूपगूढम्	5	51	,,
60	तिलतण्डुलम्	5	51	,,
61	क्षीरनीरम्	5	51	,,
62	लालाटिकम्	5	51	,,
63	समानम्	5	60	40
64	एकरसम्	5	61	,,
65	रामम्	5	62	,,
66	ऊर्ज्जम्	5	63	,,
67	प्रतितम्	5	63	,,
68	रतिसम्पुट	5	65	40
69	ओष्ठ्यम्	5	66	40

170	च्छुरितम्	5	68	41
71	युवतिः	5	69	41
72	केशोपयोगम्	5	69	41
73	अर्द्धेन्दुः	5	70	41
74	स्वस्तिकम्	5	71	41
75	अतिमस्तकम्	5	75	42
76	भुजङ्गवल्ली	5	76	42
77	कान्तावतंसः	5	77	42
78	गवसत्त्वा	5	88	43
79	गन्धर्वसत्त्वा	5	89	43
80	यक्षसत्त्वा	5	90	44
81	प्रेतसत्त्वा	5	91	44
82	बाला	5	92	44
83	तरुणी	5	92	44
84	प्रौढ़ा	5	92	44
85	वृद्धा	5	92	44
86	कन्या	5	121	48
87	स्वामिनी	5	124	48
88	देवकन्या	5	140	49
89	ब्राह्मयः	5	168	51
90	देवतकः	5	168	51
91	गान्धर्वः	5	168	51
92	पैशाचकः	5	168	51
93	आर्षः	5	168	51
94	राक्षसकः	5	168	51
95	आसुरः	5	168	51
96	प्राजापत्यः	5	168	51
97	समीरणा	7	6	63
98	चान्द्रमसी	7	7	63
99	गौरी	7	8	63
200	कामप्रदः	7	23	65
201	विपरीतः	7	23	65

□